# छत्रपतिसाम्राज्यम् ।

## अङ्कानुक्रमः


| अङ्काः | नामानि | पृष्ठाङ्काः |
|---|---|---|
| १. | साम्राज्योपक्रमः | ९१ |
| २. | निधिसंप्राप्तिः | १०३ |
| ३. | राज्यव्यवस्थितिः | ११३ |
| ४. | दूतभेदः | १२३ |
| ५. | आत्मसमर्पणम् | १३८ |
| ६. | छलप्रबन्धः | १४४ |
| ७. | मोगलेशानुसंधानम् | १४९ |
| ८. | प्रयाणप्रबन्धः | १५८ |
| ९. | दुर्गविजयः | १६७ |
| १०. | साम्राज्याभिषेकः | १७४ |
| | पद्यसूची | १८२ |
| | पद्यानां छन्दःसूची | १८४ |
| | गीतानां तालिका | १८५ |
| | गीतानां स्वरसंयोगाः | १८६ |

अथ

# छत्रपतिसाम्राज्यम् ।

## प्रथमोऽङ्कः ।

उत्तुङ्गं सुरनिम्नगावलयितं नानामृगैः संकुलं
संक्रामन्मृगयुर्द्रुतं हिमवतः शृङ्गान्तरं शृङ्गतः ।
सानन्दं विजयाय सत्त्वविजितो दिव्यं निजास्त्रं दिशन्
युष्मानेष पिनाकपाणिरवताल्लीलाकिरातः शिवः ॥१॥

**नान्द्यन्ते**

**सूत्रधारः**–(नेपथ्याभिमुखमवलोक्य) आर्ये, अलमतिपरिश्रमेण। इतस्तावदागम्यताम्।

(प्रविश्य)

**नटी**–इयमस्मि। आज्ञापयत्वार्यपुत्रः।

---

एकाकिन्यपि दिक्षु दानवदलान् विद्राव्य या लीलया
स्वाराज्यं विबुधेश्वराय ददती रेजे शिवाङ्कालया ।
नत्वा तां भुवनेश्वरीं भगवतीं प्रेम्णा पदे श्रीधरो
व्याख्यां वाक्यविशारदो वितनुते सर्वाङ्गविद्योतनीम् ॥

**अथ नाटकादौ**–'यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥ उत्थापनादिकान्यङ्गान्यस्य भूयांसि यद्यपि । तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ॥' इति विघ्नोपशान्तयेऽवश्यकर्तव्यतयोपपादितां 'आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः । नान्दीति कथ्यते' इत्यादिलक्षणलक्षितामाशीरूपां – 'सूत्रधारः पठेन्नान्दीं मध्यमं स्वरमाश्रितः । नान्दीपदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृताम्॥' इति श्रीमदभिनवगुप्तपादाचार्यमतानुसारेण चतुरस्रतालानुगतां चतुष्पदां नान्दीं सूत्रधारः पठति–**उत्तुङ्गमिति ।******* अथ 'श्लोकः काव्यार्थसूचकः' इत्युक्तत्वादस्य तत्सूचकत्वं निरूप्यते । अत्र शिवपदेन शिवराजः शृङ्गान्तरं शृङ्गत इत्यनेन नानादुर्गाक्रमणं, नानामृगैः संकुलमित्यनेन नानारिपुगणाकीर्णत्वं, मृगयुपदेन रिपुदलानुसरणं, विजयाय दिव्यं निजास्त्रं दिशन्नित्यनेन मन्त्र्यादिभ्यो मायोपायोपदेशः लीलाकिरातपदेन च किरातवत् सह्याद्रिकानने पर्यटनं सूच्यते । पिनाकपाणिपदेन चात्र वीररसस्याङ्गित्वं सूच्यते । अत्र शार्दूलविक्रीडितं वृत्तम् ।

**नान्द्यन्त इति ।** अत्र पत्रावलीसंज्ञा नान्दी – 'यस्यां बीजस्य विन्यासो ह्यभिधेयस्य वस्तुनः । श्लेषेण वा समासोक्त्या नान्दी पत्रावलीति सा ॥' इत्युक्तेः ।

**सूत्रधार इति ।** सूत्रं प्रयोगानुष्ठानं धारयतीति सूत्रधारः स्थापकनामा नटः ।



**सूत्रधारः**–अद्य खलु नटपुरवास्तव्यमूलशङ्करविरचितेनच्छत्रपतिसाम्राज्याख्येन नवेन नाटकेनैषा परिषत्सभाजनीया। तत्प्रस्तूयतां तावन्मल्लाररागेण स्वरतालबद्धा कापि रमणीया गीतिः परिषच्चेतोरञ्जनाय। संप्रति खलु,

तपनांशुतपनशमनो
ऽनिलचपलश्चञ्चलोल्लसितमेघः।
गर्जति वर्षति विकिरति
वनचरनिकरान् प्रसादयति लोकान् ॥२॥

**नटी**– यदार्यपुत्र आज्ञापयति।

(इति गायति)

**(मल्लाररागेण त्रितालेन गीयते)**

रसमति रसयति रसा विशाला।
विवलति चपलपयोधरमाला॥
भवति सपदि जनतापविलयनम्।
मृग्यति मृगपतिरुपरि निलयनम् ॥ रस० ॥१॥
नमयति तरुगणमलमासार ः।
क्षुभ्यति गर्जति पारावारः ॥ रस० ॥२॥
नन्दति मुदितो जनपदलोकः।
जलदविलोकनविगलितशोकः। ॥ रस० ॥३॥

**सूत्रधारः**–(परिषदभिमुखमवलोक्य) आर्ये, एष त्वामभिनन्दति तव संगीतकलाकौशलेन समाराधितो रङ्गः।

---

**छत्रपतीति ।** छत्रपतेः साम्राज्यं यस्मिंस्तेन छत्रपतिसाम्राज्येन नाटकेन ।

**नाटकेनेति ।** तल्लक्षणमुक्तं दर्पणे – 'नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् । विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ॥ सुखदुःखसमुद्भूति नानारसनिरन्तरम् ॥ पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः ॥ प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् । दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः । एक एव भवेदङ्गी शृङ्गारो वीर एव वा । अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः ॥ चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः । गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तिततम् ॥' इति ।

**तपनेति ।** *** अत्र कारकदीपकमलङ्कारः ।

**रसमतीति ।** *** अत्रान्त्यानुप्रासः शब्दालङ्कारः ।

**नटी**–आर्यपुत्र यत्सत्यम्

शिष्या यदुत्कर्षमवाप्नुवन्ति
प्रभाव एवैष गुरोरमोघः।
जातः प्रतापोद्धतकौरवाणां
कृष्णोपदिष्टो हि जयो विजेता ।।३।।

**सूत्रधारः**–(आकर्ण्य) आर्ये श्रृणु तव गीतप्रकर्षेणोज्जृम्भितस्य नवजलधरस्यैतन्मन्दगर्जितम्।

**नटी**–(सस्मितम्) आर्यपुत्र, नास्त्येतन्मेघगर्जितम्। किंतु संप्रति भूभारावताराय तपनान्वये शङ्करांशेनावतीर्णः शिवराजः। स्वातन्त्र्यभावनया समिद्धः

पित्रोर्गुरोश्चाधिगतार्थविद्यो
वीरानुरक्तैः सवयोभिरावृतः।
स्वराज्यसंस्थापननिश्चितव्रतो
गर्जत्ययं केसरिणः किशोरः ।।४।।

**प्रस्तावना।**

(ततः प्रविशति वयस्यैः सह शिवराजः)

**एसाजीः**–अहो किंनु खलु

प्रवर्तितं यैर्भुवनैकचक्र-
मूर्जस्वलैर्धर्मनयोपबृंहितैः।
ते भारतीया यवनेशमर्दिता
नष्टप्रभा यान्त्यभिधानशेषताम् ।।५।।

**तानाजीः**–वयस्य स्वोदरपूरणार्थं यवनेशमुपाश्रिता वयमेव तत्र कारणम्।

---

**शिष्या इति।** *** अत्र अर्थान्तरन्यासोऽलङ्कारः।

**पित्रोरिति।** *** अत्र रूपकमलङ्कारः।

**प्रस्तावनेति।** अत्रावलगिताख्या प्रस्तावना। तदुक्तं दर्पणे – यत्रैकत्र समावेशात्कार्यमन्यत्प्रसाध्यते। प्रयोगे खलु तज्ज्ञेयं नाम्नाऽवलगितं बुधैः ।। इति । अत्र नटीगीतरागस्वराणामनुरणनसादृश्योद्भावनेन स्वराज्यसंस्थानोद्यतस्य गर्जतः शिवराजस्य प्रवेशप्रसाधनादिति।

**प्रवर्तितमिति।** *** उपजातिवृत्तम्।



**बाजीः**–अस्थान एव तवायमुपालम्भः। यतो मिथोविद्वेषविभिन्नानामस्माकं यवनेशाश्रयं विना काऽन्या गतिः संभाव्यते। संप्रति तु तैरेव सुनियन्त्रिता वयं सुखेन कालं यापयामः।

**एसाजीः**–उदारचरितानस्मन्नृपतिगणान् कूटप्रबन्धैरुन्मूलयद्भिस्तैः किं न्याय्यमाचरितम्।

**बाजीः**–न सन्त्यत्रैकान्तेन दोषभाजो यवनेश्वराः। यतः

परस्परोन्मूलनसंप्रवृत्तान्
विहाय धर्मं विषयेषु सक्तान्।
नित्यं प्रजास्वापहरान्नृपालान्
निगृह्य तैर्गर्ह्यमनुष्ठितं किम् ।।६।।

**एसाजीः**–अरे किमेवं भ्रान्तोऽसि। धर्मच्युतानेतान्निगृह्य किं धर्मराज्यं स्थापितं यवनेश्वरैः। एतेषामपचारपरम्परास्मरणेन जायते मे रोमहर्षः । संमानननिमिषेण राजसभामुपस्थापितस्य सात्मजस्य जाधवरावस्याकाण्डवधेन प्रज्वालितः क्रोधानलोऽद्यापि सर्वत्र गूढं प्रज्वलति।

**बाजीः**–स्वकृतघ्नताया एवं फलमुपभुक्तं जाधवरावेण। यवनेश्वरस्तु तत्र निमित्तमात्रम्।

**शिवराजः**–वयस्याः, अलं वचनप्रतिवचनैः। परमार्थतस्तु न केवलमेकान्तेन दोषभाजो दुर्वृत्ता यवनेश्वराः किंतु तत्सधर्माण इदानींतना राष्ट्रद्रुहः क्षत्रेश्वरा अपि। यतः

दुर्वृत्ते नृपतौ तु मन्त्रिसचिवास्त्यक्त्वा नियोगं निजं
स्वच्छन्दं विहरन्ति कामवशगा उद्वेजयन्तः प्रजाः।
राष्ट्रोपप्लवशङ्कयाऽन्यनृपतिं सद्यः श्रयन्ते जनाः
कालेनापचयेन कोशबलयो राष्ट्रं ततो नश्यति ।।७।।

---

**जाधवरावस्येति ।** अत्रेदमनुसन्धेयं – ‘शिवराजस्य मातामहो जाधवरावः स्वस्वामिनं निजामशाहीशमभिद्रुह्य मोगलेशसहायोऽभवत्। ततोऽन्यः कश्चन निजामशाहीराज्यमाक्रम्य स्वायत्तीचकार। अनेन पराजिते मोगलेशबले यदा जाधवरावः पुनरपि निजामशाहीश्वरमाश्रयत्तदा संमानननिमिषेण राजसभामाहूयानेन नवेन निजामशाहीश्वरेणासौ सपुत्रो घातितः।’ इति।

तद्वयस्याः!

उद्धर्तुमेनां परिपीडितां भुवं
धर्मच्युतैरुन्मदराजसंघैः।
साम्राज्यसंस्थापनमन्तरेण
न वर्ततेऽन्याऽर्थकारी प्रतिक्रिया ।।८।।

अपिचाततायिभ्यः स्वप्रजानिर्विशेषं प्रजानां परिपालनमेव सर्वत्र राज्ञां परमो धर्मः। अतो धर्मराज्यसंस्थापनोद्यतस्य मम

दुर्वृत्तभृत्याहितराज्यभाराः
प्रजाद्रुहश्चार्थपराः कुशीलाः।
क्षत्रेश्वरा वा यवनेश्वरा वा
सद्यो भविष्यन्ति कृपाणगोचराः ।।९।।

**बाजीः**–कुमार, अपायसमाकुलो हि बलवतां विरोधः। यतः

विना विवेकं प्रतिपद्य साहसं
परापकर्षं किल यश्चिकीर्षति।
विपद्विभिन्नः स जनोऽल्पसाधनः
क्षुब्धार्णवे नौरिव सीदति स्वयम् ।।१०।।

**शिवराजः**–वयस्य साहस एव श्रीः प्रतिष्ठिता । यतः

रिपुप्रकर्षेऽप्यनपागतद्युति–
र्जितेन्द्रियः साहसविक्रमोर्जितः।
दिवानिशं यः सततं प्रयत्नवां–
स्तमेव सद्यो वृणुते नृपश्रीः ।।११।।

---

**उद्धर्तुमिति ।** अत्र मुखसन्ध्यारम्भः । 'यत्र बीजसमुत्पत्तिर्नानार्थरससंभवा । प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम् ।' इत्युक्तत्वात् ।

**आततायिभ्य इति ।** आततेन विस्तीर्णेन शस्त्रादिना अयितुं शीलमस्य । 'अग्निदो गरदश्चैव शस्त्रोन्मत्तो धनापहः । क्षेत्रदारहरश्चैतान् षड् विद्यादाततायिनः ।।'

**अतो धर्मराज्येति ।** अत्रोपक्षेपात्मकं संध्यङ्गम् । 'काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः ।' इत्युक्तेः ।



पुराऽपि साहसेनैव स्वायत्तीकृतं स्वपितृपैतामहं राज्यं पाण्डुनन्दनैः।

**एसाजीः**–अये तेजस्विनां तु साधननिरपेक्षैव साध्यसिद्धिः। यतः

स्वल्पोऽप्यग्निर्ज्वलयति न किं काननं शैलसंस्थं
मत्तेभेन्द्रान्विदलति न किं लीलया सिंहशावः।
बालोऽप्यर्को विकिरति न किं ध्वान्तमारात् क्षणेन
सर्वत्रैवाप्रतिहतरयस्तेजसां हि प्रभावः ।।१२।।

**तानाजीः**–कुमार तेजस्विनामपि साहाय्यमन्तरेण तु संशयितैव कार्यसिद्धिः। परंतु

यथा समन्तात् सरितः प्रवाहं
स्रोतांसि सर्वाणि समाविशन्ति।
तेजस्विनं लोकहितैकतत्परं
तथा स्वयं वीरगणाः श्रयन्ते ।।१३।।

**शिवराजः**–नास्त्यत्र विसंवादः। लोकहिततत्परस्य तु सन्ति निसर्गसिद्धाः सहायाः। तद्भवद्भिः प्रकल्पितैरुपायविशेषैरहं

साहाय्यमासाद्य महद्वनौकसां
ध्रुवं विजेष्ये यवनेशमुन्मदम्।
रघूद्वहाभ्यां कपिसेनया न किं
दशाननस्यापि कृता कबन्धता ।।१४।।

(प्रविश्य)

**अनुचरः**–विजयतां कुमारः। स्वभगिनीमावुत्तस्य ग्रामं प्रापयन्तं नेताजीं मार्गे समाक्रम्य सबान्धवं च तं निहत्यापहृता तस्य भगिनी बीजापुरसैनिकैः।

(इति निष्क्रान्तः)

---

**साहसेनेति ।** स्वसैन्यस्य न्यूनत्वेऽपि कौरवैः सह विग्रहारम्भरूपेणेत्यर्थः ।

**स्वल्प इति ।** *** अत्र अर्थान्तरन्यासोऽलङ्कारः । मन्दाक्रान्तावृत्तम् ।

**साहाय्यमिति ।** वने ओकः निवासः येषां तेषां वनौकसां मावळेजनानां । *** यवनेशं बीजापुरेशम् । *** यदि रामलक्ष्मणाभ्यां कपिसेनया दशाननो निहतः तदा वयं सर्वे मिलित्वा मानवसेनया एकाननं बीजापुरेशं ध्रुवं विजयेष्यामहे इति किमु वक्तव्यम् । अत्र दृष्टान्तालङ्कारः । उपजातिवृत्तम् ।

**शिवराजः**–(सरोषम्) अरे कथमेतादृशमत्याहितं क्षत्रकुलप्रसूतैरस्माभिर्मर्षणीयम्। वयस्याः

आर्तानां परिपालनाय सहसा शस्त्रं न येनोद्धृतं
विप्राणां व्रतिनां च वेदविदुषामाराधने न स्थितम्।
राज्ञामुत्पथगामिनां प्रमथने युद्धं न चैवादृतं
क्षात्रं जन्म धिगस्य राघवयशःप्रज्वालिते भारते।।१५।।

तदद्य धर्मराज्यसंस्थापनेन संपादनीयमस्मज्जीवितसाफल्यम्।

**एसाजीः**–अभिनन्द्यते कुमारभाषितम्। (दूरं विलोक्य) एष दादोजीदेशमुख इत एवाभिवर्तते।

(प्रविश्य)

**दादोजीः**–अप्यनामयं कुमारस्य।

**शिवराजः**–स्वागतं देशमुखप्रवरस्य। समन्तात् प्रवृत्ते लोकविप्लवे कुतोऽनामयं क्षत्रियाणाम्।

**दादोजीः**–तथ्यमेवाभिहितं कुमारेण। यतो लोकसंग्रहार्थमेव ध्रियन्ते क्षत्रियस्य प्राणाः। कुमार त्वदधीन एवास्त्यस्य महतः कार्यस्योपक्रमः। तद्भविष्याम्यहमत्र यावज्जीवं तव सहायः।

**शिवराजः**–अनुगृहीतोऽहं भवतां सौजन्येन। वयस्याः! प्रथमं तावदस्माभिर्बीजापुरेशहस्तगताः सह्याद्रिदुर्गाः कथमपि स्वायत्तीकर्तव्याः।

**बाजीः**–प्रचुरकोशबलाढ्योऽयं वर्तते बीजापुरेश्वरः। तत्

शक्तित्रयोत्कर्षसमेधितानां
सामाद्युपायैः परिरक्षितानाम्।

---

**आर्तानामिति ।** *** शार्दूलविक्रीडितं वृत्तम् ।

**शक्तित्रयेति ।** शक्तित्रयस्य प्रभुमन्त्रोत्साहशक्तीनामुत्कर्षेण समेधितानां समृद्धानां सामाद्युपायैः सामदानभेददण्डैः परिरक्षितानां षाड्गुण्यं 'संधिर्नाविग्रहो यानमासनं द्वैधमाश्रयः' तस्य योगेन उन्मथिताः द्विषः यैः तेषां यैः तेषां विद्वेषतः किं श्रेयः उपाश्रयेम न किमपीत्यर्थः । इन्द्रवज्रावृत्तम् ।



षाड्गुण्ययोगोन्मथितद्विषां किं
विद्वेषतः श्रेय उपाश्रयेम ।।१६।।

**एसाजीः**–बलवतामप्यभिभवायोज्झृम्भते परा संघशक्तिः। यतः

प्रभावमुख्या न हि शक्तयस्तथा
संपादयन्तीप्सितकार्यसिद्धिम्।
यथा रिपौ कोशबलप्रमत्ते
नयप्रयुक्ता परसंघशक्तिः ।।१७।।

**तानाजीः**–उदात्तचरितानामेव परिपन्थिनामभियोग उपयुक्ता एताः शक्तयो न त्वधमानाम्। अपिच

मन्त्रगुप्तिविरहाद्गणसंघौ
युक्तितस्तु भवतः सुखभेद्यौ।
माययाऽधमपरप्रतिघातः
श्रेयसे नयविदां नृपतीनाम् ।।१८।।

तत्पञ्चमोपायमात्रसाध्या भविष्यन्त्यधमारातयः।

**शिवराजः**–ममाप्येतदेवास्त्यभिमतम् । यतः

परे तु तेजस्विनि धर्म्यवृत्तौ
सामाद्युपायाः सफला भवन्ति।
न विद्यते दुर्नयशालिनां जये
मायाप्रयोगादपरा प्रतिक्रिया।।१९।।

---

**प्रभावेति ।** प्रभावः मुख्यः प्रधानः यासु ताः प्रभुमन्त्रोत्साहशक्तयः कोशबलाभ्यां प्रमत्ते रिपौ तथा ईप्सितकार्यसिद्धिं न संपादयन्ति यथा नयेन अर्थशास्त्रविहितरीत्या प्रयुक्ता परा उत्कृष्टा चासौ संघशक्तिश्च कार्यं संपादयतीत्यर्थः । उपजातिवृत्तम् ।

**मन्त्रेति ।** गणः क्षत्रियाणां वणिजां वा, संघः जानपदानां तौ मन्त्रस्य गुप्तेः रक्षणस्य विरहात् मन्त्रभेदादित्यर्थ; युक्तितः सामाद्युपायैः सुखभेद्यौ भवतः । तथा चोक्तं महाभारते – 'चारमन्त्रबलादानैः सामदानविभेदनैः । क्षयव्ययभयोपायैः प्रकर्षन्तीतरेतरम् ।।' इति । अतः मायया छलप्रयोगैः अधमः यः परः रिपुः तस्य प्रतिघातः नयविदां नृपतीनां श्रेयसे भवतीत्यर्थः । स्वागतावृत्तम् ।

**पञ्चमेति ।** सामदानभेददण्डमायेन्द्रजालोपेक्षासु पञ्चमो मायोपायः ।

अपिच

धर्मतः प्रतिविधानमात्मनो
विप्लवाय वृजिनावृते रिपौ।
विष्णुनाऽपि बलिनः सुरद्विषः
घातिताः प्रतियुगं स्वमायया ।।२०।।

**सर्वे**-सर्वथाऽभिनन्द्यते कुमारवचनम् ।

**शिवराजः**-तदेष भवन्मित्रपदमारूढोऽहमद्य प्रतिजाने यत्

मानं धनं राजविलासभोगान्
मित्राणि दारानपि जीवितं च।
हुत्वा रिपुज्वालितहव्यवाहने
संस्थापयिष्ये मम धर्मराज्यम् ।।२१।।

**सर्वे**-कुमार एतद्भीष्मप्रतिज्ञासिद्धये बद्धपरिकरानस्मान्

दुर्भेद्यदुर्गाक्रमणे प्रयाणे
रणाङ्गणे दुष्करसाहसे वा।
अवेहि राजंस्तव पार्श्ववर्तिनः
स्वजीवितेऽस्मिन्निरपेक्षतां गतान् ।।२२।।

**शिवराजः**-वयस्याः! भविष्यन्ति भवन्त एवाधिकारपदभागिनो मम धर्मराज्ये। यतः

समानविद्यानयविक्रमेषु
राष्ट्रैकभक्तिप्रथितान्वयेषु।
जितेन्द्रियेष्वेव निजाधिकारं
विभज्य साम्राज्यमुपैति भूमिपः ।।२३।।

---

**धर्मत इति ।** वृजिणावृते पापात्मनि रिपौ धर्मतः प्रतिविधानं आत्मनः स्वस्य विप्लवाय विनाशाय भवति । लोकसंग्रहार्थं मायाप्रयोगो न दोषायेत्याह । **विष्णुनेति** । अलोकसाधारणविक्रमशालिना विष्णुना अपि बलिनः सुरद्विषः दानवाः प्रतियुगं स्वमायया घातिताः । रथोद्धतावृत्तम् ।

**मानमिति ।** अत्राध्यवसायो नाम नाट्यालङ्कारः । परिकराख्यं च सन्ध्यङ्गम् ।



(ततः प्रविशत्यपटीक्षेपेण दादाजीकोंडदेवः)

**शिवराजः**-(सप्रश्रयम्) स्वागतं भगवतः।

**दादाजीः**-वत्स, विरमास्मात्साहसाध्यवसायात्। एवं कुलक्रमागतवृत्तिपरित्यागात्तु तवानर्थापत्तिरेवेति तर्कये।

**शिवराजः**-भगवन् यवनेशविद्वेषप्रभवादनर्थशतादपि श्रेय एवेति मे बलवान् प्रत्ययः। यतः

धर्मध्वंसधृतव्रतान् परधने लुब्धान् मृदौ निर्दयान्
मन्दान् विक्रमशालिनि प्रतिभटे कूटप्रयोगोत्कटान् ।
विश्वस्तेऽपि च हिंस्रकान् कुलवधूसंकर्षणे सोत्सवान्
गोविप्रेष्वपचारिणः कथमिमान् देवद्विषः संश्रये ।।२४।।

**दादाजीः**-वत्स शिवराज, सम्यगवधारितयवनेशस्वभावमद्य त्वामवरोद्धुं नोत्सहे। तच्छृणु मे परमं नयबचनं यदाश्रयणेन निष्प्रत्यूहा भविष्यन्ति तवाभिमतार्थसिद्धयः। त्वं तावत्

अन्योऽन्येर्ष्याकलुषितधियः संप्रयुञ्जन्नृपालान्
प्रीत्युद्रेकाद्वनचरपतीन् प्रीणयन् सिद्धलक्ष्यान्।
दानैर्मानैर्मधुरवचनै रञ्जयन् लोकवीरान्
लीलायुद्धैर्जय जनपदान् दुर्जयांश्चाद्रिदुर्गान् ।।२५।।

कुमार, सर्वत्र मन्त्रगुप्त्यधीन एव विजयः। तन्मन्त्रसंवरणे सदैव त्वया सावधानेन भवितव्यम्। यतः

मन्त्रो विहङ्गैः पशुभिश्च गृह्यते
तलैश्च कुड्यैः पटलैर्निशम्यते।
समीरणेनाऽपि सुदूरमुह्यते
क्वचिन्निजैराप्तजनैस्तु भिद्यते ।।२६।।

---

**धर्मेति ।** *** शार्दूलविक्रीडितं वृत्तम् ।

**अन्योऽन्येति ।** *** मन्दाक्रान्तावृत्तम् । अत्रोपदिष्टं नाम नाट्यलक्षणम् ।

एवं च सुगुप्तमन्त्रस्त्वं
साम्ना क्षत्रपुलिन्दवृन्दनृपतीनापादय स्वानुगान्
निःशङ्कं नयसंश्रितो बलवतो दृप्तान्रिपून्धर्षय।
धूर्तारातिविकल्पिते प्रतिविधौ मा स्म प्रमत्तो भवः
स्वातन्त्र्यं समुपास्स्व मन्त्रपरमः साम्राज्यमास्थापय ।।२७।।

**शिवराजः**–भगवन्नैष उपदेशः किंतु साक्षाद्वर एव। अतो भगवदनुग्रहेणाचिरेण संपादयिष्ये साम्राज्यसिद्धिम्।

**दादाजीः**–वत्स सफलाः सन्तु ते नयोपक्रमाः।

(इति निष्क्रान्तः)

**शिवराजः**–दिष्ट्या गुरुचरणा अप्यत्रानुकूलाः।

**तानाजीः**–(दूरं विलोक्य) कुमार समुपागतोऽयं जराजर्जरिताङ्गस्तोरणादुर्गपालः।

(प्रविश्य)

**तोरणादुर्गपालः**–(शिवराजमुपसृत्य) कुमार, धर्मराज्यसंस्थापनोद्यतं त्वां निशम्य तीर्थयात्राप्रवणेन मया त्वदायत्तः क्रियते मम तोरणादुर्गः । त्वं तावत्तत्र स्थित्वा प्रवर्तय तव शासनम्।

**शिवराजः**–यदत्रभवते रोचते। श्व एवाहं तत्र प्रस्थास्ये।

**तोरणादुर्गपालः**–वत्स चिरं जीव। पूरयतु तव मनोरथं भगवती परदेवता।

(इति निष्क्रान्तः)

**शिवराजः**–दिष्ट्या हस्तगतोऽस्माकं तोरणादुर्गः। एवं
अनायासेन कार्यस्य यस्य सिद्ध्यत्युपक्रमः।
आसमाप्तेर्ध्रुवं तस्य व्याघातो नैव कुत्रचित् ।।२८।।

**तानाजीः**–भवान्यनुग्रहशालिनस्ते नास्ति किमप्यसाध्यं नाम।

---

**साम्नेति ।** क्षत्राः क्षत्रियाः पुलिन्दाः वनेचराः तेषां वृन्दानि *** मन्त्रः मन्त्रिभिः संमन्त्र्य निर्णीतः अर्थः स एव परमः प्रधानः यस्य । शार्दूलविक्रीडितं वृत्तम् ।

**प्रस्थास्य इति ।** अत्र करणं नाम संध्यङ्गम् ।

**दिष्ट्येति ।** अत्र प्राप्तिर्नाम संध्यङ्गम् ।

**भवानीति ।** अत्र विलोभनं नाम संध्यङ्गम् ।



**एसाजीः**–कुमार तोरणाछद्मना तु साम्राज्यश्रीमन्दिरस्य तोरणमेव त्वया समासादितम्। अतः परं ते भद्रमेव पश्यामि।

**शिवराजः**–वयस्याः, भवतां साहाय्येन संनिहितैव मम साम्राज्यसिद्धिः। तद्युष्माभिर्महार्होपायनैर्वशीकृत्य चाकणकोण्डनेदुर्गपालौ तदधिष्ठितौ दुर्गौ संपादनीयौ। अहमपि नयेन पुरन्दरदुर्गमात्मसात्कृत्वा दुर्वृत्तं सुपेप्रान्ताधिपं मातुलं निगृह्णामि।

**सर्वे**–यदाज्ञापयति कुमारः।

**शिवराजः**–साधयामस्तावत्स्वनियोगमनुष्ठातुम्।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **साम्राज्योपक्रम**नामा प्रथमोऽङ्कः ।।

---

**भवतां साहाय्येनेति ।** अत्र परिन्यासो नाम संध्यङ्गम् ।

**प्रथमोऽङ्क इति ।** तल्लक्षणमुक्तं नाट्यशास्त्रे – 'अङ्क इति रूढिशब्दो भावैश्च रसैश्च रोहयत्यर्थान् । नानाविधानयुक्तो यस्मात्तस्माद्भवेदङ्क । ।।' इति ।

**इति श्रीछत्रपतिसाम्राज्यटीकायां सर्वाङ्गविद्योतन्यां**
**साम्राज्योपक्रमनामा प्रथमोऽङ्कः समाप्तः ।**

## द्वितीयोऽङ्कः।

(ततः प्रविशत एसाजीस्तानाजीश्च)

**एसाजीः**–अप्यभिनन्दितं देवस्याधिपत्यं चाकणदुर्गपालेन।

**तानाजीः**–अथ किम्। अपि च तस्य राजनिष्ठापरितुष्टेन देवेन पुनः स एव तत्राधिकारपदे स्थापितः।

**एसाजीः**–मयाऽपि स्वामिनियोगानुरोधेन महार्होत्कोचप्रदानेन वशीकृत्य कोण्डनेदुर्गपालं तत्र प्रवर्तितं महाराजशासनम्।

**तानाजीः**–देवेनापि परस्परविनाशायोद्यतान् पुरन्दरदुर्गपालात्मजाननुकूलान्विधाय रिक्थांशविभागेन च तान्संतर्प्य स्वायत्तीकृतः पुरन्दरदुर्गः। अनन्तरं च सहसा विजित्य स्वामिना कारागृहे निक्षिप्तो दुर्विनीतो निजमातुलः।

**एसाजीः**–अहो दैवं सर्वथाऽनुकूलमिति तर्कये।

**तानाजीः**–एवमेतत्। अन्यथा कथं नेताजीसदृशाः प्रवीराः परोक्षेऽपि स्वामिकार्यं साधयेयुः।

**एसाजीः**–(सविस्मयम्) अये किमुच्यते। नेताजीस्तु यवनसैनिकैर्निहत इति लोकप्रसिद्धिः।

**तानाजीः**–तं त्वपगतचेतनं मत्वा परावृत्ते यवनसैनिकगणे प्रकृतिमापन्नः स प्रच्छन्नमुपेत्य माथेरानयतीन्द्रं तदधिगतशस्त्रास्त्रप्रयोगकौशलस्तदादेशानुरोधेन साम्राज्यसंस्थापनोद्यतं स्वामिनमन्वेष्टुं यतिच्छद्मना राजमाचीदुर्गं प्रातिष्ठत। मार्गे च तद्दुर्गमवरोद्धुं नियुक्तस्य बीजापुरसैन्यस्य नायकं बन्दीकृत्य

यतिवसनधरो दृढायताङ्गः

प्रबलरुषा ज्वलितः स कुन्तपाणिः।

**यतिवसनेति ।** *** नियमितो निगृहीतो यो यवनेशस्य बीजापुरेशस्य सादी अश्ववारो यवनेशश्यालस्तेन जुष्टः सेवितः *** राजदुर्गं राजमाचीदुर्गं विवेश । पुष्पिताग्रावृत्तम् ।



नियमितयवनेशसादिजुष्टः

सरभसमेत्य विवेश राजदुर्गम् ।।१।।

**एसाजीः**–विक्रमैकरसा हि तेजस्विनामुपक्रमाः।

**तानाजीः**–ततश्च स्वामिप्रवृत्तिमुपलभ्य यवनवेशधरः सोऽतिक्रम्यारातिसेनानिवेशं लोहगडदुर्गावस्थितेन स्वामिना समगंस्ताभवच्च सद्य एव स्वामिनो विश्रम्भभाजनम्। संप्रति खलु द्वित्राण्यहानि तेन सह किमपि मन्त्रयमाणस्तस्मिन्नेव तिष्ठतेऽस्मन्महाराजः।

**एसाजीः**–दिष्ट्या प्रतिक्षणमेधते स्वामिनः प्रभावः।

**तानाजीः**–(ऊर्ध्वं विलोक्य) अहो प्रभाता रजनी। साधयामस्तावच्छस्त्रास्त्रपरिचयं कारयितुं नवसैनिकान्।

**एसाजीः**–तथा।

(इति निष्क्रान्तौ)

### विष्कम्भकः।

(ततः प्रविशति तोरणादुर्गोपवनस्थितः शिवराज)

**शिवराजः**–अहो

अपास्य दूरं मलिनां तमस्विनीं

क्षणेन तिर्यक् प्रसृतैर्नवांशुभिः।

लताप्रतानाम्रनिकुञ्जमण्डिता

दिवाकरेणारुणिता वनस्थली ।।२।।

तथैव स्वातन्त्र्यसूर्येणापि रञ्जितानि सह्याचलनिवासिनां मावळेजनानां मनांसि। संप्रति तेषा चत्वारिंशत्सहस्राणि प्रविविक्षन्ति मम सेनानिवहम्। किंत्वल्पधनो

**तस्मिन्निति ।** तस्मिन्नेव तिष्ठते तमेव विवादपदनिर्णेतृत्वेनाश्रयतीत्यर्थः ।

**विष्कम्भक इति ।** तल्लक्षणमुक्तं दर्पणे–वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ।। इति ।।

**अपास्येति ।** *** वंशस्थवृत्तम् ।

**किंत्वल्पधन इति ।** अत्र प्रतिमुखसन्ध्यारम्भः । तदुक्तं दर्पणे– ‘फलप्रधानोपायस्य मुखसंधिनिवेशिनः। लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत् ।।’ इति ।

नोत्सहे तान्विनियोक्तुम्। अपिच द्वीपान्तराद्विक्रयार्थं संप्राप्तं महान्तं शस्त्रास्त्रायुधसंचयं सार्धलक्षेणाऽपि क्रेतुं प्रार्थयते मां फिरङ्गी वणिक्पतिः। यदृच्छयोपेतोऽयमवसरो मया कथं ग्रहीतव्यः। अहो

स्वातन्त्र्यवह्निर्ज्वलितः समन्ततः
सह्याचलो मोदयते मनो मे।
वनेचरान् सैन्यगणे नियोक्तुं
न चास्म्यलं तन्नितरां दुनोति ॥३॥

(पुरतो विलोक्य) एष गृहीतसंकेतो वीर इत एवाभिसर्पति।

(प्रविश्य)

**नेताजीः**–विजयतां देवः।

**शिवराजः**–अपि चिन्तितस्त्वया दुर्गसंतरणोपायः।

**नेताजीः**–प्रथमं तावदादिशतु देवो मां राजमाचीदुर्गं प्रस्थातुम्। अल्पैरपि भटैरहं नाशयिष्यामि तद्दुर्गावरोधकगणम्।

**शिवराजः**–वीर संप्रति तु कथमपि शस्त्रास्त्रपरिक्रयेणाधिष्ठानबलं संनाह्य तदजय्यं विधातुं स्वायत्तीकृतानां च दुर्गाणां प्राकारपरिखादिभिर्दुष्प्रधर्ष्यत्वमापादयितुमतीवोत्कण्ठितोऽस्मि।

**नेताजीः**–देव युगपत्समुपस्थितानां व्यवसायानां क्रमेणैवोपपन्नो विनियोगः। तत्पूर्वं राजमाचीरक्षण एव तावदात्मानमभिनिवेशयतु देवः । एवमुत्तरोत्तरविजयेन भविष्यति देवस्य साम्राज्यसिद्धिः।

**शिवराजः**–(निःश्वस्य) सर्वथा साधनविकलस्य कुतो मे साम्राज्यसंस्थापन–सौभाग्यम्। यतः

विना भृतिं भृत्यगणाः प्रिया मे
विनाग्रभित्तिं प्रवराश्च दुर्गाः ।

---

**स्वातन्त्र्येति ।** *** च वनेचरान् मावळेजनान् *** उपजातिवृत्तम् । अत्र हर्षविषादयोर्युगपदाविर्भावाद्भावसन्धिः। तदुक्तं दर्पणे–'भावस्य शान्तावुदये संधिमिश्रितयोः क्रमात्। भावस्य शान्तिरुदयः संधिः शबलता मता ॥' इति। अत्र च विधानाख्यं संध्यङ्गम् ।

**साधनविकलस्येति ।** अत्र तापनं नाम संध्यङ्गम् ।



विना बलं मे प्रबलोऽन्तरात्मा
सर्वेऽवसीदन्ति सह प्रवीर ॥४॥

केवलमिदानीमवशिष्यते चरमं विधेयम्। त्वया सह भवानीमन्दिरमुपाश्रित्याभीष्टं संपादयितुमद्य प्रातरादिष्टोऽस्म्यहं भगवत्या परदेवतया। यदि तत्रापि मे भाग्यविप्लवस्तदानीं तु

त्वय्येव वीराग्रसरे समग्रां
विन्यस्य राष्ट्रोद्धरणप्रवृत्तिम्।
अकिंचनो दण्डकपालपाणिः
परिव्रजिष्यामि परात्मनिष्ठः ॥५॥

**नेताजीः**–देव धर्मराज्यसंस्थापनोद्धृतकृपाणस्य तवास्थान एवायं निर्वेदः। यतः

अन्तरायनिकषैः परीक्षिताः
प्राप्नुवन्ति मनुजा महत्पदम् ।
विघ्नविक्लवधियो निरुत्सवा
हेलयापि निपतन्त्यधीश्वराः ॥६॥

तद् धैर्यमवलम्ब्य साम्राज्यसंपादनार्थं बद्धपरिकरो भव। तवानुशासनपरेणैव मया वर्तितव्यमित्यादिष्टोऽस्मि भगवता सिद्धतापसेन। न चैतदन्यथा भवितुमर्हति। तद्

अनन्यभावः परदेवतायां
मनः समाधाय लभस्व वाञ्छितम्।
किमाश्रितः कल्पतरुं कदाचि–
न्निवर्तते कोऽप्यनवाप्तकामः ॥७॥

**शिवराजः**–वीर सम्यगनुबोधितोऽस्मि। कः कोऽत्र भोः।

(प्रविश्य)

**अङ्गरक्षकः**–आज्ञापयतु देवः।

**शिवराजः**–भवानीमन्दिरमार्गमादेशय।

**अङ्गरक्षकः**–इत इतो देवः।

(सर्वे परिक्रामन्ति)

एतन्मन्दिरद्वारं तत्प्रविशतु देवः।

(इति निष्क्रान्तः)

**शिवराजः**–वीर अत्र स्थित्वा मां प्रतिपालय। यावदहं भगवतीमाराध्य प्रत्यावर्ते।

**नेताजीः**–तथा।

(इति द्वारदेशमधितिष्ठति)

**शिवराजः**– (मन्दिरं प्रविश्य साश्रु साष्टाङ्गं प्रणिपत्य स्तौति)

**(कर्णाटरागेण त्रितालेन गीयते)**

तारय तव सुतमम्ब भवानि।।
प्रबलयवनरिपुगलितविभावम्।
प्रलयपयोनिधिविलुलितनावम्।
पालय परममृडानि।। तारय० ।।१।।
विबुधनुते वनुते तव दासः।
विजयरमां हुतदिव्यविलासः।
वारय मम विषमाणि ।। तारय० ।।२।।
त्वमसि ममैकं परमं शरणम्।
कलयसि यदि हितमार्योद्धरणम्।
दारय विघ्नशतानि।। तारय० ।।३।।
वितरसि यदि नहि करुणालेशम्।
धृत्वा ममाटनं यतिवेषम्।
निश्चितमयि शर्वाणि।। तारय० ।।४।।

**तारयेति ।** *** यदि आर्याणां भारतीयानामुद्धरणं हितं श्रेयस्करं कलयसि मन्यसे तदा मम विघ्नशतानि दारय नाशयेत्यर्थः । ***



(आकाशे)

मा शुचः सहायसाध्यास्ते सिद्धयः।

**शिवराजः**–(आकर्ण्य) शरणागतवत्सले त्वदनुग्रहपरवशा एव मे प्रार्थितसिद्धयः। (प्रणम्य द्वारदेशमुपसृत्य) वीर त्वदधीना मे सिद्धय इति भगवत्या आदेशः। तन्ममाङ्गरक्षकबलेनाक्रम्य बीजापुरप्रदेशमाहरापेक्षितं हिरण्यसंचयम्।

**नेताजीः**–देव पुरोवर्तिजीर्णदेवालयकोणप्रस्तरप्रच्छन्नो महान् निधिस्त्वयोत्खातव्य इति मम पुनरान्तरः प्रत्ययः।

**शिवराजः**–न मृषा भवितुमर्हति तवायं प्रतिभासः। यतः

संयतेन्द्रियमनाः प्रसन्नधीः
प्रत्यगात्मनि च यः समाहितः।
तस्य यत्स्फुरति भाविदर्शनं
नैव तद्भवति संशयावहम् ।।८।।

कः कोऽत्र भोः।

**अङ्गरक्षकः**– आज्ञापयतु देवः।

**शिवराजः**– शिल्पिमुख्यं द्रष्टुमिच्छामि।

**अङ्गरक्षकः**– तथा।

(इति निष्क्रान्तः)

**शिवराजः**–वीर माथेरानयतीन्द्रवचसा खलु प्रोत्साहितोऽस्मि।

(प्रविश्य)

**शिल्पिमुख्यः**–विजयतां देवः।

**शिवराजः**–(जीर्णदेवालयं निर्दिश्य) तत्र खनित्वा यदुपलभ्येत तत्सत्वरमिहाहर।

**शिल्पिमुख्यः**–तथा।

(इति खनित्वा भाण्डान्याहृत्य)

दिष्ट्याऽधिगतान्येतानि द्रव्यपूर्णानि भाण्डानि निखातभूमिविवरात्।

(इति स्थापयति)

**संयतेति ।** *** रथोद्धतावृत्तम् ।

**शिवराजः**–रेचयैतान्यत्र शिलापट्टे।

**शिल्पिमुख्यः**–तथा।

(इति रेचयित्वा निष्क्रामति)

**नेताजीः**–देव बहुमूल्यो लक्ष्यतेऽयं महानिधिः।

**शिवराजः**–अये नैष निधिः किंतु साक्षात् स्वातन्त्र्यदेवतैवास्मत्पुरतः समुल्लसति। वीर

अवेहि नैनं पुरतः प्रसारितं
हिरण्यरत्नप्रचयं महानिधिम्।
एतत्त्वमोघायुधसंचयप्रदं
साम्राज्यलक्ष्म्या वपुरेव मूर्तिमत् ।।९।।

**नेताजीः**–देव सर्वत्र धैर्यमूलान्येव भद्राणि।

**शिवराजः**–एवमेतद्। कः कोऽत्र भोः।

(प्रविश्य)

**अङ्गरक्षकः**–आज्ञापयतु देवः।

**शिवराजः**–मणिकारं द्रष्टुमिच्छामि।

**अङ्गरक्षकः**–तथा।

(इति निष्क्रान्तः)

**शिवराजः**–संप्रति प्रभविष्याम्यहं संनाहयितुं मम वीरनिवहान्। अथ कियत्परिमाणोऽयं निधिः परिकल्प्यते।

**नेताजीः**–देव पर्याप्त एवायमस्मत्प्रयोजनाय।

(प्रविश्य)

**मणिकारः**–विजयतां देवः

**शिवराजः**–अवधार्यतामस्य कोशसंचयस्य मूल्यपरिमाणम्।

**मणिकारः**–(निरीक्ष्य) देव सूक्ष्ममानेनायं दशलक्षहिरण्यार्घो भवितुमर्हति।

**शिवराजः**–तावत्पत्र आरोप्य विस्तरेण दर्शयास्य मूल्यपरिच्छेदव्यञ्जकं

---

**अवेहीति ।** *** उपजातिवृत्तम् । अत्रापह्नुतिरलङ्कारः ।



परिसंख्यानम्।

**मणिकारः**–तथा।

(इति यथोक्तं कुरुते)

**शिवराजः**–वीर महानेषोऽनुग्रहः परदेवतायाः । यतः संप्रति खलु मम

शस्त्रास्त्रसंनद्धरणोत्सुका भटाः
सद्यः पराहत्य परप्रवीरान्।
अत्युत्कटं मर्मविदारणं द्विषां
प्रकाशयिष्यन्त्यतुलं पराक्रमम् ।।१०।।

(प्रविश्य)

**अङ्गरक्षकः**–एष द्विभाषसमेतः फिरङ्गी देवं द्रष्टुमिच्छति।

**शिवराजः**–शीघ्रमेनं प्रवेशय।

**अङ्गरक्षकः**–तथा।

(इति निष्क्रान्तः)

(प्रविश्य)

**द्विभाषः**–(फिरङ्गिणं निर्दिश्य) एष महाराजस्य सुप्रभातमावेदयति ।

**शिवराजः**–प्रीतोऽस्म्यस्य समुदाचारेण। क्रीतो मया सार्धलक्षेणायुधसंचय इति तमावेदय।

**द्विभाषः**–तथा।

(इति यथोक्तं कुरुते)

**शिवराजः**–अपि सुव्यवस्थितोऽयं व्यवहारः।

**द्विभाषः**–अथ किम्। एष पुनर्महाराजस्यानुग्रहमभिनन्द्य गमनायानुज्ञां याचते।

**मणिकारः**–(उपसृत्य) एतत्सविस्तरं परिसंख्यानम्।

(इति पत्रमर्पयति)

**शिवराजः**–(पत्रमादाय वाचयित्वा) द्विभाष आगामुकमप्यायुधसंचयं वयमेव क्रेष्याम इति वणिक्पतिमगवमय।

**द्विभाषः**–तथा।

(इति यथोक्तं कुरुते)

**शिवराजः**–अये मणिकार प्रापयैतावावेशिकमन्दिरम्। मद्वचनाच्चोच्यतां तत्राधिकृतोऽध्यक्षो यदयं वैदेशिकः सपरिवारमातिथ्येन संमाननीय इति।

**मणिकारः**– तथा ।

(इति निष्कान्तास्त्रयः)

**शिवराजः**–कः कोऽत्र भोः।

(प्रविश्य)

**अङ्गरक्षकः**–आज्ञापयतु देवः।

**शिवराजः**–मन्त्रगृहमार्गमादेशय।

**अङ्गरक्षकः**–इत इतो देवः।

(सर्वे परिक्रामन्ति)

एतन्मन्त्रगृहद्वारं प्रविशतु देवः सानुगः ।

(इति निष्क्रान्तः)

(ततः प्रविशन्ति मन्त्रगृहावस्थिता मन्त्रिणः)

**शिवराजः**–(प्रविश्य) मन्त्रिणः दिष्ट्या संपन्नोऽस्माकं मनोरथः।

**मन्त्रिणः**–(उत्थाय) वर्धतां देवोऽभीष्टसंपदा।

(इति शिवराजमनु सर्व उपविशन्ति)

**शिवराजः**–सचिव त्वं तावदविलम्बेन निर्माय नूतनं दुर्भेद्यप्राकारादिपरिवेष्टितं राजगडदुर्गमापादयास्य राजधानीयोग्यताम्। तावत्तत्र स्थिता वयं राजकार्याणि पश्येम।

**सचिवः**–यदाज्ञापयति देवः।

(इति निष्क्रान्तः)

**शिवराजः**–वीर त्वमपि फिरङ्गिणः क्रीतैरायुधैः संनाह्य मावळेजनवाहिनीं कल्याणजयार्थमस्माभिर्नियुक्तमाबाजीवीरं संप्रतिपद्यस्व। सद्य एव



सुतीक्ष्णभल्लासिधनुःसमूर्जिता
विशालतूणीपरिणद्धपार्श्वाः।
स्वातन्त्र्यसंभावनया समेधिताः
प्रयान्तु मे वन्यपदातिसंघाः ।।११।।

**नेताजीः**–यद्देव आज्ञापयति।

(इति निष्क्रान्तः)

**शिवराजः**–अमात्य, त्वयि विनिहितराज्यभारोऽहमपि तावत्सेनानायकेन सह कोंकणजयार्थं प्रतिष्ठे। तदवेक्षस्वाद्यप्रभृति सर्वाणि राजकार्याणि।

**तानाजीः**–यदाज्ञापयति देवः।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **निधिसंप्राप्ति**नामा द्वितीयोऽङ्कः।।

---

**सुतीक्ष्णेति ।** *** उपजातिवृत्तम् ।

**इति श्रीछत्रपतिसाम्राज्यटीकायां सवाङ्गविद्योतन्यां निधिसंप्राप्तिनामा द्वितीयोऽङ्कः समाप्तः ।**

## तृतीयोऽङ्कः ।

(ततः प्रविशति राजगडदुर्गप्रासादावस्थितो मन्त्रिद्वितीयः शिवराजः)

**शिवराजः–**मन्त्रिन् सुव्यवस्थितेऽपि राज्यतन्त्रे कथमद्यापि निर्वृतिं न व्रजति मेऽन्तरात्मा।

रात्रिंदिवं रिपुगणान् शतशो निहत्य
नीतो वशं प्रसभमेष मया प्रदेशः।
नायं तथापि परिपन्थिवधाकुलो मे
तृप्तिं प्रयाति नितरां तृषितः कृपाणः ।।१।।

**मन्त्री–**देव न खल्वल्पीयसाऽर्थेन परितुष्यन्ति तेजस्विनः।

उद्भास्य शैलशिखरोच्छ्रितपादपाग्रं
तेजोनिधिः किमुदितो विरमेद्विवस्वान्।
अप्युद्गतो गगनमध्यपदं क्रमेण
धाम्ना निजेन निखिलं भुवनं चकास्ति ।।२।।

संप्रति खल्वस्मदुपक्रमसंरब्धो बीजापुरेशो महता सैन्येन सहसाऽस्मानभियोक्ष्यत इत्याशङ्कते मे हृदयम्।

**शिवराजः–**मयाऽप्येतदेव विमृश्यते।

(नेपथ्ये)

**वैतालिकः–**विजयतां देवः।

जनपदहितदक्षो नीतियोगप्रतिष्ठो
विदलितरिपुसंघः स्वाभिलाषे वितृष्णः।

---

**द्वितीयाङ्कान्ते–**'यावत्तत्र स्थित्वा राजकार्याणि पश्येम' –इति शिवराजेन सूचितस्य तृतीयाङ्कस्य पूर्वाङ्काविभागत इवावतीर्णत्वादङ्कावतारोऽत्रार्थोपक्षेपकः । तदुक्तं दर्पणे – 'अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः। यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः ।।' इति ।

**रात्रिंदिवमिति ।** *** वसन्ततिलकावृत्तम् ।

**उद्भास्येति ।** ***वसन्ततिलकावृत्तम् ।

**जनपदेति ।** *** हे तपनकुलस्य सूर्यवंशस्य मणे । मालिनीवृत्तम् ।



शरणमुपगतानां दुर्गतानां शरण्य-
स्तपनकुलमणे त्वं राजसेऽमोघवीर्यः ।।३।।

**शिवराजः–**(आकर्ण्य) अहो नयप्रयोगाश्रयणेन सुखसाध्या भविष्यन्त्यरातय इति नास्त्यत्रौत्सुक्यकारणम्। तथापि सर्वात्मना बलोपचय आधीयतां यत्नः।

**मन्त्री–**पूर्वमेव मयादिष्टः सेनानायकः पदातिदलसंग्रहाय।

(प्रविश्य)

**द्वारपालः–**विजयतां देवः। एष कोंकणप्रान्तात् संप्राप्तो गोंवळकरसामन्तो द्वारि तिष्ठति।

**शिवराजः–**प्रवेशयैनम् ।

**द्वारपालः–**तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**सामन्तः–**विजयतां महाराजः । सर्वत्र विजयशालिनो महाराजस्य प्रणयपुरःसरमुपायनीक्रियत एष भवानीखड्गः ।

देवानां नवविजयध्वजो रणाग्रे
दैत्यानां प्रलयकृदेव धूमकेतुः ।
पापानां हृदयविदारणो महोग्रः
खड्गोऽयं तव परिकल्पितो भवान्या ।।४।।

तत्स्वीकृत्यैनमनुगृहाण तव दासजनम् ।

**शिवराजः–**(सानन्दं स्वीकृत्य निरीक्ष्य च) भगवति परदेवते,

नैष प्रभाज्वलिततीक्ष्णकरालधारो
निस्त्रिंश एव कटिबन्धतटावलम्बी ।
किं त्वम्ब दुष्कृतवधार्थमनन्तमूर्तेः
खड्गात्मना परिणतोऽस्ति तवावतारः ।।५।।

---

**देवानामिति ।** *** प्रहर्षिणीवृत्तम् । अत्र रूपकालङ्कारः ।

**नैष इति ।** *** वसन्ततिलकावृत्तम् ।

यावज्जीवमेष भवतु मे प्राणसारः।

(इति शिरसाऽभिवन्द्य धारयति)

**सामन्तः**–महानेषोऽनुग्रहो महाराजस्य ।

(इति निष्क्रान्तः)

**मन्त्री**–देव, एतन्मण्डलाग्रमण्डितस्य भविष्यति तव सर्वत्राप्रतिहतप्रसरो विजयध्वज इति विभावये ।

(प्रविश्य)

**द्वारपालः**–एष आबाजीवीरो द्वारि संप्राप्तः ।

**शिवराजः**–शीघ्रमेनं प्रवेशय ।

**द्वारपालः**–तथा ।

(इति निष्क्रान्तः)

(ततः प्रविशति कल्याणप्रान्ताधिपस्नुषया सहित आबाजीः)

**आबाजीः**–वर्धतां देवः कल्याणविजयेन । देवाधीनाः सन्ति तत्र बन्दीकृतस्य तत्प्रान्ताधिपस्य प्राणाः ।

**शिवराजः**–सद्यस्तं कारागृहाद्विमुच्य यथार्होपचारैश्च संभाव्य विसर्जय ।

**आबाजीः**–यद्देव आज्ञापयति । अपि च महाराजायोपायनीकर्तुमानीतमेतदलोकसाधारणं स्त्रीरत्नम् । तत्स्वीकृत्यानुगृह्णात्विमं दासजनम् ।

**शिवराजः**–(सरोषम्) अरे किमिदं त्वयाऽनार्यमनुष्ठितम् ।

तपनकुलभवस्य धर्मवृत्ते–
रपि परदाररतिर्विभाव्यते किम् ।
विषममुपगतोऽपि राजहंसः
किमु बकवृत्तिमुपाश्रयेत्कदाचित् ।।६।।

(मन्त्रिणं प्रति) तदुद्घुष्यतां तारस्वरेणास्मद्धर्मराज्ये यच्छिवराजस्य तद्भृत्यानां

---

**मण्डलाग्रेति ।** मण्डलाग्रः खड्गः तेन मण्डितस्य यद्वा मण्डलस्य सामन्तचक्रस्य अग्रेण प्रधानस्थानेन मण्डितस्य अलङ्कृतस्य । पताकास्थानमिदम् । तदुक्तं दर्पणे 'द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः । प्रधानार्थान्तराक्षेपी पताकास्थानकं परम् ।।' इति ।



च दुहितृनिर्विशेषाः परस्त्रिय इति ।

**मन्त्री**–यथाज्ञापयति महाराजः ।

(इति पत्रे निवेशयति)

**आबाजीः**–प्रसीदतु देवः । सांप्रतं राजकुलसाधारणोऽयमुपचार इति कृत्वा मयाऽत्र प्रवृत्तम् । तदनुकम्पनीयोऽयं दासजनः ।

**शिवराजः**–तव विक्रमेण परितुष्टोऽहमद्य त्वां कल्याणप्रान्ताधिपत्ये नियुनज्मि। तन्न्यायेन प्रजाः पालयंस्तत्रास्माकं धर्मचक्रं प्रवर्तय ।

**आबाजीः**–यथाज्ञापयति देवः ।

(इति प्रान्ताधिपस्नुषया सह निष्क्रान्तः)

(प्रविश्य)

**द्वारपालः**–विजयतां देवः । सप्तशतं गान्धारसैनिका महाराजस्य विजययशोभिः समाकृष्टा बीजापुरेशमपहाय महाराजाश्रयमन्विष्यन्ति । श्रुत्वा देवः प्रमाणम् ।

**शिवराजः**–मन्त्रिन् कथमेते विश्वसनीयाः ।

प्रत्यर्थिनः परिजनेऽतितरां विनीते
स्त्रैणे मृषोक्तिपरमे विषयप्रसक्ते ।
धर्मध्वजे द्विषति हीनकुलोद्भवे च
विश्वस्य नाशमुपयाति पुरन्दरोऽपि ।।७।।

**मन्त्रीः**–महाराज मन्त्राधिकारनियोगपरोऽयं परामर्शः । सैनिकानां तु नास्ति कश्चन स्वतन्त्रोऽधिकारः । तन्नोचितोऽत्र प्रतिषेधः । अथ चैते परधर्मिण इति कृत्वाऽपि न युक्तः प्रतिषेधः । यतः

विभिन्नधर्मा नृपतिर्निजाः प्रजाः
समत्वमास्थाय सदैव पालयेत् ।
स्वधर्मनिर्बन्धपरस्तु हेलया
प्रजाविरोधात् प्रबलोऽपि हीयते ।।८।।

---

**प्रत्यर्थिन इति ।** प्रत्यर्थिनो रिपोः परिजने भृत्यवर्गेऽतितरां विनीते नम्रे स्त्रैणे स्त्रीजिते मृषाऽनृतोक्तिर्वाक् परमा यस्य तस्मिन् विषयेषु प्रसक्ते इन्द्रियारामे इत्यर्थः धर्मध्वजे दाम्भिके द्विषति रिपौ हीनकुले उद्भवो जन्म यस्य तस्मिंश्च विश्वस्य पुरन्दर इन्द्रोऽपि नाशमुपयाति । वसन्ततिलकावृत्तम् ।

**शिवराजः**–सत्यं समदृष्ट्यधीनैव साम्राज्यप्रतिष्ठा । (द्वारपालं प्रति) तदुच्यतां मद्वचनात्सेनापतिर्यथावदेतेषां नियोगाय ।

**द्वारपालः**–तथा ।

(इति निष्क्रान्तः)

**शिवराजः**–मन्त्रिन्, नास्ति पर्याप्तं केवलं पदातिदलं प्रबलारातिनिग्रहाय । तदस्माभिः शीघ्रं सादिदलमप्युपकल्पनीयम् ।

**मन्त्री**–देव नेताजीवीराधिष्ठितं सादिदलमचिरेणैव भविष्यति रणावतारक्षमम्। तद्राजमाचीतो यदाऽसौ प्रत्यागच्छेत्तदाऽस्मिन्नेव कार्ये नियोजनीयः ।

**शिवराजः**–सर्वथाऽभिनन्द्यते तवाध्यवसायः ।

(प्रविश्य)

**द्वारपालः**–विजयतां देवः । एष राजमाचीतः प्रत्यागतो नेताजीवीरो द्वारि तिष्ठति ।

**शिवराजः**–प्रवेशयैनम् ।

**द्वारपालः**–तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**नेताजीः**–विजयतां देवः । कृषीवलच्छद्मनान्तःप्रविष्टेन गूढचरेण निशीथेऽधः प्रसारितां रज्जुमवलम्ब्य प्राकारमधिरूढैरस्मत्सैनिकगणैर्निहता राजमाच्युपरोधकारिणो यवनसैनिकाः ।

**शिवराजः**–वीर प्रशंसनीयं खलु तवैतत्साहसविक्रान्तम् । अपि परितोष्यते यथार्होपचारेण त्वया बन्दीकृतो यवनेशश्यालः ।

**नेताजीः**–अथ किम् । को नु खलु महाराजशासनमतिक्रमितुं प्रभवति । देव तत्र निरुद्धाः सन्त्यन्येऽप्येतद्युद्धगृहीता यवनसैनिकाः ।

**शिवराजः**–मन्त्रिन् आदिश राजमाच्यधिकृतं तान् विसर्जयितुम् ।

**मन्त्री**–यदाज्ञापयति देवः ।

(इति पत्रे निवेशयति)



**शिवराजः**–वीर प्रत्यासन्न एवापरः संग्रामः । तत्संनाहय सादिनिवहान् ।

**नेताजीः**–यद्देव आज्ञापयति ।

(इति निष्क्रान्तः)

(प्रविश्य)

**चरः**–देवस्य स्वातन्त्र्यनिष्ठया संरब्धेन दुरात्मना बीजापुराधीशेन कारागारे निरुद्धास्तातपादाः ।

(इति निष्क्रान्तः)

**शिवराजः**–(सरोषम्) अरे दुर्मदान्ध, अपि सन्निष्ठया विहितायास्ते सपर्याया ईदृशः परिणामः । अथवा कृतोपकारेभ्य एव द्रुह्यन्ति दुरात्मानः ।

विहाय कान्तासुतबन्धुवर्गान्
कुलप्रतिष्ठामथ जीवितस्पृहाम् ।
हन्त्येकभक्त्याऽपि निषेवितोऽधमः
पर्याप्तकामः स्वयमेव सेवकम् ।।९।।

**मन्त्री**–सर्वत्रात्मनाश एवाधमशुश्रूषायाः पारितोषिकम् ।

**शिवराजः**–मन्त्रिन् कथमपि रक्षणीयाः पितृचरणाः । यतः

राज्ञः प्रजायाः परिपालनं यथा
भृत्यस्य भर्तुर्हितसाधनं च ।
कुलस्त्रियः पत्युरथानुवर्तनं
तथा सुतस्यास्ति गुरोरुपासनम् ।।१०।।

**मन्त्री**–देव, अत्र समामनन्ति नयशास्त्रकोविदा यत्

संधानं सत्यसन्धे नयगुणविहितं विग्रहो हीनसत्त्वे
यानं चान्तर्विपन्ने गिरिगहनगते चासनं दुर्गसंस्थे ।

---

**कथमपीति ।** अत्र नीतिर्नाम नाट्यालङ्कारः ।

**संधानमिति ।** सत्या संधा प्रतिज्ञा यस्य तस्मिन् नयस्य नीतिशास्त्रस्य गुणेषु संध्यादिगुणेषु विहितं संधानं संधिः हीनं सत्त्वं बलं यस्य तस्मिन् विग्रहः, अन्तःप्रकृतिषु विपन्ने विपदाभिभूते यानं, गिरौ गहने वने च गते दुर्गसंस्थे चासनं, व्यूहैरप्रधर्ष्येऽनाक्रम्ये द्वैधं, कुटिलो यो नयस्तस्मिन् रते शक्तीनां प्रभुमन्त्रोत्साहशक्तीनां योगेनावलिप्ते गर्विते प्रत्यर्थिनि रिपौ नः श्रेयसे प्रबलनरपतेः संश्रयः कार्यः । स्रग्धरावृत्तम् ।

द्वैधं व्यूहाप्रधर्ष्ये कुटिलनयरते शक्तियोगावलिप्ते
प्रत्यर्थिन्याशु कार्यः प्रबलनरपतेः संश्रयः श्रेयसे नः ॥११॥

तदेतद्विपत्संतरणार्थं दिल्लीपतिरेव समाश्रयणीयः । यतः

सदाश्रयोऽयं विदुषां कलावतां
निजे परे चापि समानभावः ।
निरस्तपापः स्वयमप्रमत्तः
प्रजाः प्रजाः स्वा इव शास्त्यधीशः ॥१२॥

**शिवराजः**–ममाप्येतदेवाभिप्रेतम् । यतः

दिल्लीशोपाश्रयेणैव वशं नेयोऽयमुद्धतः ।
दुर्दान्तस्याधमस्यास्य नास्त्यन्या दमनक्रिया ॥१३॥

तत्प्रयुज्यतां कोऽपि कार्यक्षमो निसृष्टार्थो दूतोऽस्मदभीष्टं संपादयितुम् ।

**मन्त्री**–गच्छतु रघुनाथपन्त एतत्कार्यसंसिद्धये ।

**शिवराजः**–स्थान एवास्य नयविचक्षणस्य पण्डितवरस्य नियोगः । कः कोऽत्र भोः ।

(प्रविश्य)

**द्वारपालः**–आज्ञापयतु देवः ।

**शिवराजः**–पण्डितवरं द्रष्टुमिच्छामि।

**द्वारपालः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

**शिवराजः**–विलिख्यतां तावद्विज्ञापनपत्रम् ।

**मन्त्री**–तथा ।

(इति पत्रं लिखति)

**शिवराजः**–(लेख्यमादिशति)

श्रीमद्भारतराजकुलाधीश्वरसाम्राज्यश्रीनिकेतनसार्वभौममोगलेश-चरणरचिताञ्जलिः शिवराजः सप्रश्रयं प्रार्थयते यत्सार्वभौमस्य भृत्यवर्गं प्रविविक्षुरयं जनो यथार्हनियोगेनानुग्राह्य इति । अपिच कृतघ्नेन बीजापुरेशेन विनाऽपराधं कारागृहे निरुद्धानां निजतातपादानां मुक्तिसंपादनेनानुग्रहान्तरमभिलषत्ययं सार्वभौमभृत्यः। वितरतु कृपापारावारे श्रीसार्वभौमेऽनन्तयशःसमृद्धिवैभवं विश्वनियन्तेत्याशास्ते च । इति ।



**मन्त्री**–देव लिखितं मया यथादिष्टम् ।

(प्रविश्य)

**पण्डितवरः**–विजयतां देवः ।

**शिवराजः**–आदायैतद्विज्ञापनपत्रं प्रतिष्ठस्व तावद्दिल्लीनगरम् । तत्र च सार्वभौममनुकूलं विधाय सर्वात्मना संपादयास्मत्तातपादानां विमुक्तिम् ।

(इति स्वनाममुद्राङ्कितं विधाय पत्रमर्पयति)

**पण्डितवरः**–(पत्रमादाय) यद्देव आज्ञापयति ।

(इति निष्क्रान्तः)

**शिवराजः**–कः कोऽत्र भोः ।

(प्रविश्य)

**द्वारपालः**–आज्ञापयतु देवः ।

**शिवराजः**–अन्तर्गृहमार्गमादेशय ।

**द्वारपालः**–इत इतो देवः ।

(उभौ परिक्रामतः)

एतदन्तर्गृहद्वारं प्रविशतु देवः ।

(इति निष्क्रान्तः)

(ततः प्रविशत्यन्तर्गृहावस्थिता राजमाता राज्ञी च)

**शिवराजः**–(प्रविश्य) अम्ब, अभिवादये ।

**राजमाता**–वत्स चिरं जीव । अप्यस्ति कश्चिद्विशेषः ।

**शिवराजः**–कृतघ्नेन बीजापुरेशेन बन्दीकृतानां तातपादानां विमुक्तये कर्तव्यतयापतितो मोगलेशसंश्रयः ।

---

**यथार्हनियोगेनेति ।** अत्राश्रयो नाम नाट्यालङ्कारः ।

**राजमाता**–सुतन्त्रितोऽयं मन्त्रनिर्णयः । भविष्यत्यनेन तवाभीष्टसिद्धिः । यतः

न सर्वदा विक्रमशालिनोऽप्यलं
भवन्त्यरातीन् सहसा प्रधर्षितुम् ।
ऊर्जस्विनां साहसमस्ति विप्लुते
नयप्रयोगेऽगतिका गतिर्ध्रुवम् ।।१४।।

तत्प्रेषय पण्डितवरमेनमर्थं संपादयितुम् ।

**शिवराजः**–अम्ब तथैव मया प्रकल्पितम् । एवं त्वयाऽनुमोदितस्य नितरां मोदते मेऽन्तरात्मा ।

**राजमाता**–वत्स श्रुतं मया चारेभ्यो यत्प्राणान्तविपद आत्मानं रक्षितुं धर्मान्तरमाश्रितो बजाजीवीरः पुनः स्वधर्मं प्रवेष्टुमिच्छति । अस्त्यत्र प्रतिकूलोऽस्मद्बन्धुवर्गः । परंतु साम्राज्यसंस्थापनप्रवृत्तेन त्वया कर्तव्यो वीरसंग्रहः । अतो यथाविधि परिशोधितस्यास्यात्मजाय स्वकन्यां प्रदाय संपादयास्य चिरसौहृदम्।

**शिवराजः**–शिरसि क्रियते तवादेशः ।

**राजमाता**–वत्स युज्यस्व भूयोभूयोमङ्गलेन । अथ महेश्वराराधनाय साधयामि देवगृहम् ।

(इति निष्क्रान्ता)

**राज्ञी**–आर्यपुत्र, अद्य खलु

लोकप्रकाशनमरातितमोऽपहारि
संतर्पणं नयनमानसयोर्वपुस्ते ।
एतन्नवोपचितयौवनराज्यलक्ष्म्या
तेजोद्वयस्य युगपत्सुषमां दधाति ।।१५।।

**शिवराजः**–देवि त्वमेवासि मम सकलमङ्गलानामेकायतनम् । यत्त्वं

---

**लोकेति ।** *** तेजोद्वयस्य सूर्याचन्द्रमसोर्युगपत्समकालमेव *** वसन्ततिलकावृत्तम् । अत्र निदर्शनालङ्कारः ।



प्रोत्साहनेन समराङ्गणतत्परस्य
प्रत्यागतस्य च पराक्रमणानुयोगैः ।
उद्वेजितस्य नयमार्गविकल्पनैश्च
श्रान्तस्य नर्मवचसा तनुषे सुखं मे ।।१६।।

**राज्ञी**–आर्यपुत्र धर्म एवैष सहधर्मचारिणीनां क्षत्राङ्गनानाम् । निसर्गत एव

तव व्रते मे हृदयं प्रतिष्ठितं
मनश्च मे त्वन्मनसैकतां गतम् ।
त्वयि प्रसन्ने भवति प्रसन्नं
समाकुलं चाकुलिते त्वयि प्रिय ।।१७।।

**शिवराजः**–(स्वगतम्) अहो नु खलु धन्योऽस्मि । (प्रकाशम्) तव सुधास्यन्दिवचोभिराप्यायितोऽहं पुनः पुनर्नवतामुपेत्यारातीनभिभवितुमुत्सहे ।

**राज्ञी**–संप्रत्यधर्मप्रायेषु राजकुलेषु धर्मवृत्तेस्तव सुखोपगमैव विजयश्रीः ।

**शिवराजः**– (शतघ्नीस्वनमाकर्ण्य) अहो जातः खलु सेनानिरीक्षणसमयः । यावत्साधयामि ।

**राज्ञी**–अहमपि तावच्छिवाराधनाय देवगृहमुपैमि ।

(इति निष्क्रान्तौ)

।। समाप्तोऽयं **राज्यव्यवस्थिति**नामा तृतीयोऽङ्कः ।।

---

**प्रोत्साहनेनेति ।** *** वसन्ततिलकावृत्तम् ।

**इति श्रीछत्रपतिसाम्राज्यटीकायां सर्वाङ्गविद्योतन्यां राज्यव्यवस्थितिनामा तृतीयोऽङ्कः समाप्तः ।**

## चतुर्थोऽङ्कः ।

(ततः प्रविशतो राजपुरुषौ)

**प्रथमः**–भद्र किमेवं प्रक्रान्तेऽपि महोत्सवे नियोगशून्य इवात्र परिभ्रमसि ।

**द्वितीयः**–अये किंनिमित्तोऽयं महोत्सवः ।

**प्रथमः**–अहो किं न जानास्यद्य खलु भवानीप्रतिष्ठायाः परिसमाप्तिदिनमिति।

**द्वितीयः**–भद्र राजकार्यार्थं देशान्तरं प्रस्थितोऽहमद्यैवात्र संप्राप्तः ।

**प्रथमः**–दिष्ट्यैतत्प्रतिष्ठामहोत्सवार्थं समुपस्थितस्य श्रीरामदासस्वामिनः सान्निध्येन पवित्रीकृत एष प्रतापगडदुर्गः । भविताऽद्य देवस्यानेन महात्मना समागमः। अपि नामास्मिंस्तपोनिधौ भक्तिप्रवणो भवेदस्मद्देवः । यतः स एवास्ति समर्थो देवस्य विघ्नशतान्यपि विदारयितुम् ।

**द्वितीयः**–अप्यस्ति कश्चित्प्रतिकूलप्रसङ्गावकाशो येनैवं ब्रवीषि ।

**प्रथमः**– अथ किम् । कारागृहाद्विनिर्मुक्तस्य शाहजीमहाराजस्य पुनः कर्णाटाधिकारपदावाप्त्यनन्तरं बीजापुरेशस्य पुरतो देवं बन्दीकर्तुं प्रतिजज्ञेऽसूयाविष्टो धूर्तः शामराजः । एतत्प्रतिज्ञासिद्धये च जावळीप्रान्ताधिपसाहाय्यमपेक्षमाणः स तमेवाश्रित्यावर्तत । अत्र च निवसता शामराजहतकेन सह्याद्रिवनं पर्यटतो देवस्य वधार्थं नियुक्तान् मारात्मकान् किरातान्निहत्य रक्षितो देवस्तत्राकस्मादुपस्थितेन नेताजीवीरेण।

**द्वितीयः**–एवं मिथोविद्वेषकलुषितेष्वस्मत्क्षत्रवीरेषु कुतः स्वातन्त्र्याधिगमो भारतीयानाम् ।

**प्रथमः**–ततश्च सुखं प्रत्यागतेन देवेन संदिष्टं तस्य क्षत्राधमस्य जावळीप्रान्ताधिपस्य यद्

विक्रीय देशकुलधर्मयशोऽभिमानं

म्लेच्छाधिपाय न मनागपि लज्जसे त्वम् ।

---

**विक्रीयेति ।** *** वसन्ततिलकावृत्तम् । अक्ष दृष्टान्तालङ्कारः ।



आक्रम्य लुब्धकगणैरपि पाशबद्धः

किंवा श्ववृत्तिमभिनन्दति सिंहशावः ।।१।।

इति । परंतु प्रत्यासन्नमरणेन तेन सर्वथा प्रत्याक्षिप्तं देवस्य मन्त्रितम् । ततश्च समिद्धमन्युना देवेनासौ क्षत्रकुलापसदः क्षिप्रमेव यमालयं प्रेषितः ।

**द्वितीयः**– धन्यं हि नयपाटवं देवस्य । सद्य एव वध्यो विषोल्बणः कृष्णसर्पः।

**प्रथमः**–अथ रोगाक्रान्तं मोगलसम्राजमुपश्रुत्य दिल्लीनगरं प्रयाते तद्युवराजे जावळीप्रान्ताधिपवधसंजातामर्षेण बीजापुरेशेन देवं निग्रहीतुमाज्ञप्तः स्वसेनानायकः। तदचिरेण भविष्यति पुनरपि युद्धारम्भः ।

**द्वितीयः**–अप्यस्ति विदितमेतद्देवस्य ।

**प्रथमः**–चारचक्षुषो देवस्य नास्ति किमप्यगोचरम् । (पुरतो विलोक्य) एष परिसमाप्य प्रतिष्ठाकार्यं प्रस्थितो देवो राजमन्दिरम् ।

**द्वितीयः**–भद्र, अहं तावद्देशान्तरोदन्तमावेदयितुमुपैमि मन्त्रिसदनम् ।

**प्रथमः**–अहमपि स्वनियोगपरिपालनाय प्राप्नोमि राजमन्दिरम् ।

(इति निष्क्रान्तौ)

### विष्कम्भकः ।

(ततः प्रविशति श्रीरामदासेन सह शिवराजः।)

**शिवराजः**–(सप्रश्रयम्) दिष्ट्याद्य कृतार्थतां गमितोऽस्मि चिरप्रार्थितेन भगवत्प्रसादाधिगमेन ।

(इति पुष्पस्रजं कण्ठे समर्प्य पादयोः पतति)

**श्रीरामदासः**–भारतैकवीर, उत्तिष्ठ । धर्मराज्यसंस्थापनार्थं शङ्करांशेनावतीर्णस्य तव भवतु सर्वत्राप्रतिहतो विजयः ।

**शिवराजः**–(उत्थाय) प्रतिगृहीताशीः । (सनिर्वेदं) भगवन्, अथ मया यावज्जीवं किमेवमेव हिंसाप्रधानो धर्मोऽनुष्ठेयः ।

**श्रीरामदासः**–व्यवस्थितवर्णाश्रमेऽस्मिन् भारते वर्षे दुष्कृतां हिंसनं साधूनां च परित्राणमेव क्षत्रियस्य परो धर्मः । तन्नयमार्गमव लम्ब्योत्पथगामिनो नृपाधमांश्चोन्मूल्य

---

**तद्युवराज इति ।** तद्युवराजे दक्षिणापथाधिकारपदनियुक्ते मोगलयुवराजे इत्यर्थः ।

प्रवर्तय तव धर्मशासनम्। न चैवं प्रवर्तमानस्य तव श्रेयःप्रतिबन्धः । यतः

लोकसंग्रहपरैर्जितात्मभिः
कर्मयोगनिरतैर्नृपोत्तमैः ।
पाप्मनां प्रमथने प्रकल्पितो
धर्मतन्त्रमपि बाधते नयः ।।२।।

परंतु

धर्मप्रवृत्ताः परिपन्थिनस्त्वया
साम्नैव राजन् स्ववशं विधेयाः ।
न धर्मगुप्ते हि नयप्रयोगाः
कदाचिदप्यर्थपरा भवन्ति ।।३।।

एवं धर्मनयप्रतिष्ठितेन च त्वया नानाधर्माः प्रजाः समबुद्ध्यैव पालनीयाः । यतः ।

वृत्तं यथा धर्मभयेन रक्ष्यते
नृभिस्तथा नैव नरेन्द्रशासनात् ।
धर्मान् सदाचारपरानतो नृपः
प्रजाहितज्ञो नियमेन पालयेत् ।।४।।

एवं प्रवर्तमानस्य तव सर्वथाऽनुकूला भविष्यति जगन्नियन्त्री परदेवता ।

**शिवराजः**–भगवन् तवानुग्रहेणाद्य निवृत्तं मे मोहावरणम् नवीकृतश्च साम्राज्यसंस्थापनोत्साहः ।

**श्रीरामदासः**–वत्स तव साहाय्यार्थं प्रतिमठं मया विनीयन्ते राष्ट्रभावभाविताः शतशो युवगणाः । तदिमे

व्यायामयोगोपचिताङ्गसत्त्वा
विद्याकलादण्डनयप्रतिष्ठिताः ।
राष्ट्रैकभक्ता उपधाविशोधिता
भवन्तु ते भाविरणे सहायाः ।।५।।

---

**लोकेति ।** *** रथोद्धतावृत्तम् । अत्रोपदिष्टाख्यं लक्षणम् ।
**व्यायामेति ।** *** धर्मार्थकामभयैः परीक्षणमुपधा–ताभिः विशोधिताः । *** उपजातिवृत्तम्।



**शिवराजः**–अहो परमार्थतो भगवतैवारब्धे राष्ट्रोद्धरणोद्यमेऽहं तु निमित्तमात्रमेव। यत्सत्यं ब्रह्मसमेधितमेव क्षत्रमृध्नोति ।

**श्रीरामदासः**–वत्स यत्र ब्रह्म च क्षत्रं च समीची चरतस्तत्रैव साम्राज्यश्रीर्विलसति । अतः

ये क्षमा स्वतपसा दुरात्मनां
निग्रहेऽपि च सतामनुग्रहे ।
ब्रह्मवर्चसिन आत्मयाजिन–
स्तान्सभाजय सदा स्वगुप्तये ।।६।।

अपिच साम्राज्यसमृद्धये त्वया प्रयत्नेनानुरञ्जनीया निषादपञ्चमाश्चत्वारो वर्णाः। यतः

यथाऽत्र लोकव्यवहारसिद्धये
भवेत्समर्थोऽविकलेन्द्रियः पुमान् ।
तथा नृपः पञ्चजनोपसंग्रहात् ।
साम्राज्यसौभाग्यफलाय कल्पते ।।७।।

**शिवराजः**–भगवतो महिम्ना वशीकृतोऽयं जनोऽतःप्रभृति शिष्यदृष्ट्याऽनुकम्पनीयः ।

**श्रीरामदासः**–वत्स न केवलं शिष्य इति त्वमसि मम प्रेमास्पदम् । अपितु त्वमसि मे द्वितीयं हृदयम् । त्वदधीनैवास्ति मे साध्यसिद्धिः । तन्मया सततं सावधानेनोदीक्ष्यते त्वद्विजयध्वजप्रसरः । संप्रत्यपि त्वां निर्विण्णमुपश्रुत्य संप्राप्तोऽस्म्यहं तव प्रोत्साहनार्थमेतद्दुर्गराजम् । अथ त्वां स्वकर्मण्यभिप्रवृत्तं वीक्ष्य प्रतिष्ठेऽहं धर्मप्रवचनाय दुर्गान्तरम् ।

**शिवराजः**–भगवताऽनुग्राह्योऽयं जनो भूयो दर्शनेन ।

**श्रीरामदासः**–भारतैकवीर, संपादयतु तवाभीष्टं भगवती परदेवता ।

(इति निष्क्रान्तः)

---

[**ये क्षमा इति । बह्मवर्चसिन इति ।** ‘ब्रह्महस्तिभ्यां वर्च्चसः’ (पा. ५.४.७८) इति सूत्रेण ‘वर्च’ इति शब्दस्य अच्–प्रत्ययान्तत्वे सिद्धे ‘अत इनिठनौ’ (५.२.११५) इति सूत्रेण पदं सिध्यति ।–सम्पादकः]

**शिवराजः**–कः कोऽत्र भोः ।

(प्रविश्य)

**द्वारपालः**–आज्ञापयतु देवः ।

**शिवराजः**–मन्त्रगृहमार्गमादेशय ।

**द्वारपालः**–इत इतो देवः ।

(उभौ परिक्रामतः)

एतन्मन्त्रगृहद्वारं प्रविशतु देवः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**शिवराजः**–स्वागतं मन्त्रिवराणाम् ।

**मन्त्रिणः**–(उत्थाय) विजयतां महाराजः ।

(इति शिवराजमनूपविशन्ति)

(प्रविश्य)

**द्वारपालः**–देवं द्रष्टुकामः कोऽपि यवनतापसो द्वारि तिष्ठति ।

**शिवराजः**–प्रवेशयैनम् ।

**द्वारपालः**–तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**चरः**–विजयतां देवः । कथमपि तं सह्यमूषकं गृहीत्वा सत्वरमानयामीति बीजापुरेशसभायां प्रतिज्ञाय मार्गे च भवानीप्रतिमां खण्डशः कृत्वा द्वादशसहस्रसैनिकदलेन सह संप्राप्तोऽत्र पापात्मा बीजापुरसेनानायकः ।

(इति निष्क्रान्तः)

**शिवराजः**–(आकर्ण्य सरोषम्) अरे जाल्म

अविदिततपनान्वयप्रतापः
किमिति वृथा त्वमु गल्भसे मदान्ध ।

---

**अविदितेति ।** *** पुष्पिताग्रावृत्तम् । अत्र गर्वो नाम नाट्यालङ्कारः ।



परधनपरिपुष्टमञ्जसा त्वां
महिषबलिं परिकल्पये भवान्याः ॥८॥

**नेताजीः**–(सरोषम्) सद्य एव मां तस्याततायिनो निग्रहार्थमादिशतु देवः । अद्यैवाहं

कामक्रोधातिरेकव्यसनविदलितं दुर्विनीतं मदान्धं
त्वत्कोपाग्निप्रदग्धं परिणतविभवं चायुषोऽन्तं गतं तम् ।
हत्वा निःशेषतस्तद्बलमतिविपुलं तर्पयित्वा कृपाणं
जीवग्राहं गृहीत्वा निगडितचरणं तेऽन्तिकं प्रापयामि ॥९॥

**शिवराजः**–(विचिन्त्य) वीर नात्र साहसप्रतिपत्तिरुचिता । तत्त्वयाऽधिष्ठिताः

प्रच्छन्नं परिपन्थिनां परिचयं कुर्वन्त्वनल्पं स्पशा
अध्यक्षाः स्वपदातिसादिनिवहान्संनाहयन्तूद्यताः ।
दुर्गाणामवने भवन्त्ववहिता दुर्गाधिपा निश्चलाः
सद्यो रोपयितुं प्रतापमुदितः कालो द्विषामन्तकः ॥१०॥

**नेताजीः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**द्वारपालः**–देव अरातिनिसृष्टो दूतो द्वारि तिष्ठति ।

**शिवराजः**–प्रवेशयैनम् ।

**द्वारपालः**–तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**कृष्णाजीः**–विजयतां महाराजः ।

---

**सद्य एव मामिति ।** अत्रोदाहरणाख्यं संध्यङ्गम् ।

**कामक्रोधेति ।** जीवग्राहं गृहीत्वा जीवन्तं गृहीत्वेत्यर्थः । अत्रोत्साहः स्थायिभावो निजभर्तृपरिपन्थ्यालम्बनं तर्जनमनुभाव आक्षेपो गर्वश्च संचारिणौ । एवमत्र युद्धवीरो रसः । स्रग्धरावृत्तम् ।

**प्रच्छन्नमिति ।** *** शार्दूलविक्रीडितं वृत्तम् । अत्र गर्भसन्ध्यारम्भः । 'फलप्रधानोपायस्य प्रागुद्भिन्नस्य किंचन । गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान्मुहुः ॥' इत्युक्तत्वात् ।

**अरातिनिसृष्टो दूतः इति ।** कृष्णाजीनामा विप्रः ।

**शिवराजः**–स्वागतं विप्रवर्यस्य ।

**कृष्णाजीः**–अप्यनामयं महाराजस्य ।

**शिवराजः**–अथ किम् ।

**कृष्णाजीः**–देव उभयतः सैनिकानां विनाशं परिजिहीर्षुरावेदयत्यस्मत्सेनापतिर्यन्महाराजेन स्वकुलपरंपरागतवृत्तिस्वीकरणेन परित्यज्य बीजापुरेशस्य विरोधमङ्गीकर्तव्यो भृत्यधर्म इति ।

**शिवराजः**–नास्त्यस्माकं बीजापुरेशेन सह कोऽपि विरोधः किंतु दुर्वृत्तेभ्यस्तदधिकृतेभ्यः प्रजायाः पालनार्थमेवायमस्मदुपक्रमः ।

**कृष्णाजीः**–तन्महाराजेन स्वायत्तीकृतस्य प्रदेशस्याधिपत्ये तावद् भविष्यति महाराजस्यैव नियोगः । तद्यथा बीजापुरेशशासनमनुरुध्य शाहजीमहाराजः कर्णाटप्रदेशं पालयति तथैव महाराजेन सह्यप्रदेशः पालनीयः । एतदर्थं च महाराजेन यथावकाशं द्रष्टव्योऽस्मत्सेनापतिः ।

**शिवराजः**–अत्र नास्माकं विप्रतिपत्तिः । कः कोऽत्र भोः ।

(प्रविश्य)

**द्वारपालः**–आज्ञापयतु देवः ।

**शिवराजः**–प्रापयैनं विप्रवर्यमावेशिकमन्दिरम् । उच्यतां च मद्वचनात्तत्राधिकृतो यदेष द्विजोत्तमो राजोपचारैः संभावनीय इति ।

**द्वारपालः**–तथा ।

(इति दूतेन सह निष्क्रान्तः)

**शिवराजः**–मन्त्रिणः, अनेन किमपि हृदये कृत्वाऽन्यदेव मन्त्रितमिति लक्ष्यते। यतः

नयप्रयुक्तैर्मधुरैर्वचोभिः
प्रतारणार्थं ध्रुवमुद्यतस्य ।
कालुष्यमन्तः स्थितमस्य केवलं
व्यनक्ति विच्छायमुखच्छविः स्वयम् ।।११।।

**मन्त्री**–एवमेतत् । यतः



नेत्रप्रसादः स्वयमाननद्युतिः
स्वाभाविकी चैव वचःप्रवृत्तिः ।
अल्पोपचारो गतमप्यविक्लवं
विवृण्वतेऽन्तर्हृदयस्थमार्जवम् ।।१२।।

तत्कथमपि ज्ञातव्यमस्य मनोगतम् ।

**शिवराजः**–पूर्वं तावद्यवनसेनापतये विसृष्टोऽस्मद्दूतस्तमावेदयतु यद्

प्रमादतस्त्वादृतसाहसः प्रभु-
र्महद्विरोधादनुतप्यमानः ।
निरीक्ष्य नेत्रप्रतिघाति ते महो
धैर्यच्च्युतः प्रार्थयते तवाश्रयम् ।।१३।।

अनेनोत्सिच्यमानः स मदान्धोऽस्मन्नयपाशधृतो भविष्यति ।

**मन्त्री**–सद्य एव प्रेषयामि पन्तोजीगोपीनाथमेतदर्थसंसिद्धये ।

(इति निष्क्रान्तः)

**शिवराजः**–अहमपि तावत्प्रत्यर्थिदूतं विविक्त उपगृह्णामि । (इति मन्त्रगृहान्निर्गत्य परिक्रामति । परितो विलोक्य) अहो

निशेयमाक्रान्ततमिस्रभीषणा
पापात्मनां पापचिकीर्षिते हिता ।
स्वधर्मदक्षे नृपतौ तु जाग्रति
स्वपन्ति सर्वा अकुतोभयाः प्रजाः ।।१४।।

(पुरतो विलोक्य) एतदावेशिकमन्दिरम् । यावत्प्रविशामि ।

(ततः प्रविशति सुवर्णमञ्चावस्थितोऽरातिदूतः)

**दूतः**–(ससंभ्रममुत्थाय) अहो महाराजः । कोऽयं मय्यसाधारणोऽनुग्रहः ।

**शिवराजः**–(महार्हं रत्नमुपायनीकृत्य) धर्म एवैष क्षत्रियाणां यद्विप्रोपासनम् । (इति मञ्चान्तरमुपविशति)

---

**प्रमादत इति ।** *** उपजातिवृत्तम् । अत्राभूताहरणं नाम संध्यङ्गम् ।

**महार्हरत्नमिति ।** अत्र संग्रहाख्यं संध्यङ्गम् ।

**दूतः**–(उपविश्य) देव त्वादृशा धर्मज्ञा एवार्हन्ति लोकतन्त्राधिकारम् ।

**शिवराजः**–विप्रवर्य, सर्वत्र ब्रह्मैधितमेव क्षत्रं समृध्यते । बृहस्पतिपुरोगमा देवा विप्रपुरोगमाश्च राजन्या एव युज्यन्ते विजयश्रियेति पुराणप्रसिद्धिः ।

**दूतः**–महाराज संप्रति तु क्षत्रापचारपरिपीडितानां विप्राणां यवनेशोपाश्रयादृते नास्त्यन्यदवलम्बनम् ।

**शिवराजः**–तथ्यमेवाभिहितं विप्रवर्येण । अत एवैतान्नृपापसदानुन्मूलयितुं मया शस्त्रमुद्धृतम् ।

**दूतः**–सर्वथाऽभिनन्द्य एव तव धर्म्यो व्यवसायः । परंतु प्रथममेव बलिना यवनेशेन विग्रहमारभमाणस्य तव महती नयच्युतिः ।

**शिवराजः**–संभाव्यमेतत् । तथापि न केवलं यवनसहाय एव प्रभवति प्रशासितुं निजराष्ट्रं यवनेश्वरः । सन्ति तत्राप्यधिकृताः स्वधर्मपरमा धर्मवीरा ये पुनः समुपस्थित उपप्लवे ममोपकरिष्यन्तीत्यवधार्यैव मयादृत एव उपक्रमः ।

**दूतः**–परंतु स्वधर्मनिष्ठानामपि भर्तुरनिष्टापादनेन त्वपरिहार्य एव कृतघ्नतादोषः।

**शिवराजः**–विप्रवर्य, कोऽयं व्यामोहो भवादृशानां वेदधर्मतत्त्वविदुषाम् । 'स्वधर्मे निधनं श्रेयः' – इति तु साक्षाद्भगवतैव तारस्वरेणोद्घोषितम् । यदि स्वधर्मनिष्ठानां धर्मार्थमात्मनाशोऽपि श्रेयांस्तदा कियान् भर्तुर्विप्रकारः । पुराऽपि धर्मार्थं

वज्रस्य निर्माणविधौ सुरार्थितां
स्वयं महर्षिस्तनुमप्यहासीत् ।
शिरः कुठारेण च जामदग्न्य-
श्चिच्छेद मातुर्गुरुणा नियुक्तः ।।१५।।

**दूतः**–देव नात्र प्रवर्तते मे प्रतिवचनम् ।

**शिवराजः**–अये द्विजोत्तम

**वज्रस्येति ।** *** स्वदेहमपि महर्षिः दधीचिनामा स्वयमहासीत् त्यक्तवान् । *** जामदग्न्यः परशुरामः गुरुणा पित्रा नियुक्तः आज्ञप्तः कुठारेण मातुः शिरः चिच्छेद । उपजातिवृत्तम् । अत्र निदर्शनाख्यं लक्षणम् ।



भवन्ति विप्रा यदि धर्ममूर्तयो
विरोधिनो धर्मपरस्य भूभृतः ।
तदा प्ररोहैः सह धर्मपादपः
समूलमुच्छेदमवाप्नुयाद् ध्रुवम् ।।१६।।

**दूतः**–(विचिन्त्य) कीदृशं साहाय्यमपेक्षते महाराजः ।

**शिवराजः**–केवलं तत्त्वतो ज्ञातुमिच्छामि सेनापतेश्चिकीर्षितम् ।

**दूतः**–(स्वगतम्) किं कर्तव्यो मया रहस्यभेदः । उत घातयितव्यो धर्मावतारः। अस्तु । धर्मावतारस्यैव रक्षणेन रक्षितो भविष्यति धर्मो नान्यथा । (प्रकाशम्) देव न किमप्यस्ति तवावाच्यम् । तच्छृणु । कथमपि त्वां विश्वास्यात्मनः प्रतिज्ञां निर्वाहयितुमुत्कण्ठतेऽस्मत्सेनापतिः ।

**शिवराजः**–अहो नु खलूज्जीवितोऽस्मि । द्विजोत्तम न कदापि स्मृतिपथमतीतो भविष्यति तवायमनुग्रहः । परंत्ववशिष्यते किंचित्कर्तव्यान्तरम् ।

**दूतः**–निःशङ्कमाख्यातु धर्मवीरः ।

**शिवराजः**–विप्रवर्य, 'अतीव भयाकुलः शिवराजो महता सैन्येन परिवृतं त्वामुपाश्रयितुं न धृष्णोति । अतो दुर्गपरिसरप्रतिष्ठापितोपकार्यामुपेत्य त्वयैकाकिना स हस्तगतः कर्तव्यः । अन्यथा तस्मिन् कुत्रापि पलायिते तव प्रतिज्ञाहानिप्रसङ्गः ।' –इति तमनुनीय संपादयावयोरेकान्तसमागमम् । अतः परं यद्भावि तद्भवतु ।

**दूतः**–देव अत्र विस्रब्धो भव । त्वया पुनरात्मदूतमुखेनैतदेव तस्य संदेष्टव्यम्।

**शिवराजः**–तथा ।

**दूतः**–सद्य एव तावत् प्रतिष्ठे देवस्याभीष्टसंपादनाय ।

**शिवराजः**–अहमपि मन्त्रगृहमुपेत्य प्रतिपालयामि चरमाध्यवसायम् ।

(इति निर्गत्य परिक्रामति)

(स्वगतम्) दिष्ट्या सुसंपन्न एष पूर्वरङ्गः ।

**भवन्तीति ।** अत्रानुनयाख्यं लक्षणम् ।
**कथमपीति ।** अत्र क्षिप्तिर्नाम संध्यङ्गम् ।

क्षेत्रेऽपि सीरोत्कषणावकल्पिते
उप्त्वा सुबीजानि समृद्धभूमौ ।
समुद्गतेष्वेव नवाङ्कुरेषु
क्षेत्री समुत्पश्यति शस्यसंपदम् ।।१७।।

अनेनाक्षिप्तेऽपि भाविविजये कथं निर्वृतिं नाधिरोहति मेऽन्तरात्मा । यावदन्तःपुरमुपेत्याम्बया सह संमन्त्रये । (पुनः परिक्रम्य) अहो सा तु मामेव प्रतिपालयन्त्यद्याप्यवतिष्ठते ।

(इत्यन्तःपुरं प्रविशति)

(ततः प्रविशति राजमाता राज्ञी च)

**राजमाता**–वत्स, अप्यनुकूलितः प्रत्यर्थिदूतः ।

**शिवराजः**–अथ किम् । परंतु कदाचिद्दुर्दैवतोऽत्र विपरीतमापद्येत तदानीं त्वयाऽधिष्ठितेनोमाजीराजेन प्रवर्तनीयः स्वराज्यसंस्थापनोद्योग इत्येषा ममाभ्यर्थना ।

**राजमाता**–वत्स, देवतानुग्रहशालिनस्ते नास्त्यपायशङ्कावसरः । तद्

यवनसादिपदातिसमुद्धतं
रिपुदलं परिमृद्य रणाङ्गणे ।
विजयदुन्दुभिनिःस्वननन्दितः
पुनरुपेत्य विनोदय मातरम् ।।१८।।

वत्स रक्षतु त्वां समन्ततः समराधिष्ठात्री परदेवता ।

**शिवराजः**–शिरसाऽभिनन्द्यन्ते तवाशिषः ।

**राजमाता**–परास्ताः सन्तु ते विद्विषः ।

**राज्ञी**–विजयश्रीविलसितस्य भवतु तवाचिरेण मङ्गलागमनम् ।

**शिवराजः**–कः कोऽत्र भोः ।

(प्रविश्य)

**कञ्चुकी**–आज्ञापयतु देवः ।

**शिवराजः**–मन्त्रगृहमार्गमादेशय ।

---

**क्षेत्रेऽपीति ।** *** उपजातिवृत्तम् ।
**यवनसादीति ।** अत्राशीर्नाम नाट्यालङ्कारः ।



**कञ्चुकी**–इत इतो देवः ।

(उभौ परिक्रामतः)

एतन्मन्त्रगृहद्वारं प्रविशतु देवः ।

(इति निष्क्रान्तः)

(ततः प्रविशन्ति मन्त्रगृहावस्थिता मन्त्रिणो दूतश्च)

**शिवराजः**–(प्रविश्य) अप्युपस्थितोऽस्मद्दूतः ।

**मन्त्री**–एष देवं प्रतिपालयंस्तिष्ठति ।

**शिवराजः**–(दूतं प्रति) किमध्यवसितं यवनसेनापतिना ।

**दूतः**–जातमभीष्टं देवस्य । अद्य प्रातरेवायमभिकाङ्क्षति देवस्य समागमावसरम्।

**शिवराजः**–भद्र सद्य एव निवृत्य तमावेदय 'दुर्गोपत्यकायामुपकल्पितामुपकार्यामुपेत्य यथासमयं त्वया दृष्टव्यः शिवराजः' इति।

**दूतः**–तथा ।

(इति निष्क्रान्तः)

**शिवराजः**–सचिव त्वं तावच्छीघ्रमुपत्यकायां हिरण्यरत्नमण्डितामुपकार्यामुपकल्पय ।

**सचिवः**–तथा ।

(इति निष्क्रान्तः)

**शिवराजः**–सेनापते त्वं तावच्छैलोत्सङ्गपादपान्तरितपदातिनिवहो मार्ग एव मां प्रतिपालय ।

**नेताजीः**–तथा ।

(इति निष्क्रान्तः)

**मन्त्री**–देव सायुधवर्मधरेण त्वया द्रष्टव्यः कुटिलः परिपन्थी ।

**शिवराजः**–प्रतिपद्येऽहं मन्त्रिवचनम् ।

(इति वर्म शिरस्त्राणं वृश्चिकास्त्रं व्याघ्रनखांश्च धारयति)

**मन्त्री**–अत्र भवतु तानाजीवीरस्तव सहायः ।

**तानाजीः**–पूर्वमेवादिष्टोऽस्म्यम्बया धूर्तयवनसमागमे तव पार्श्वचरो भवितुम्।

**शिवराजः**–जीवितसंशयेऽस्मिन्व्यतिकरे त्वमेवार्हसि मम पार्श्वस्थानम् । (ऊर्ध्वं विलोक्य) अहो प्रभातकल्पा हि रजनी । यावत्साधयामः ।

(इति सपरिवारः तुरगमारुह्य परिक्रामति)

(परितो विलोक्य) अमात्य क्षणमात्रेणैव संप्राप्ता वयं शैलावरोहसंक्रमम् । एषोऽस्मदागमनं प्रतीक्षमाणस्तिष्ठति सपरिजनो नेताजीः ।

(ततः प्रविशति सपरिजनो नेताजीः)

**नेताजीः**–(दूरं विलोक्य) अहो, उपस्थितो देवः ।

प्रजवतुरगकल्पितासनोऽयं
कवचधरः करवालकुन्तनद्धः ।
अरुणितनयनो रुषा महोग्रः
सरभसमेत्यभितो द्विषां कृतान्तः ।।१९।।

(शिवराजमुपसृत्य) विजयतां देवः । अस्ति सर्वं सुव्यवस्थितम् ।

**शिवराजः**–(परितो विलोक्य) वीर पश्य

एतद्विरूढतरुगुल्मलतावितान–
मुत्सङ्गवर्ति गहनं गहनान्तरालम् ।
प्रच्छन्नसत्त्वमभितः पवनावधूत–
मुल्लोलवीचिजलधेः समतां विधत्ते ।।२०।।

**नेताजीः**–देव अत्रैव निलीयन्तेऽस्मत्सैनिकनिवहाः ।

**शिवराजः**–त्वं तावच्छृङ्गस्वनेनास्मत्संकेतं गृहीत्वा द्रुतमभियुङ्क्ष्वारातिसैन्यम्।

**नेताजीः**–यद्देव आज्ञापयति ।

**शिवराजः**–वयं तावत्पुरतो व्रजामः ।

(इति सपरिवारो निष्क्रान्तः)

**नेताजीः**–पदातिसेनापते, अवगमय सैनिकान् संकेतक्रमम् ।

---

**पार्श्वचर इति ।** अत्र साहाय्यं नाम नाट्यालङ्कारः ।

**एतद्विरूढेति ।** *** वसन्ततिलकावृत्तम् । अत्र उपमाऽलङ्कारः ।



**एसाजीः**–तथा ।

(इति निष्क्रान्तः)

**नेताजीः**–गुल्माध्यक्ष, सज्जीकुरु वैतालिकगणान् प्रयाणपटहध्वननाय ।

**गुल्माध्यक्षः**–यदार्य आज्ञापयति ।

(इति निष्क्रान्तः)

(प्रविश्य)

**एसाजीः**–आर्य गृहीतः संकेतक्रमः सैनिकगणैः ।

**नेताजीः**–साधु ।

(वैतालिकैः सह प्रविश्य)

**गुल्माध्यक्षः**–आर्य, उपस्थिता यथादेशमेते वैतालिकाः ।

**नेताजीः**–(तारस्वरेण) भवत सर्वे सावधानाः ।

(शृङ्गध्वनिमाकर्ण्य ससंभ्रमम्) प्रवर्तन्तां वो रणातोद्यानि । शीघ्रमभिसरत सर्वे सेनानिवहाः ।

(इति सपरिजनो निष्क्रामति)

**वैतालिकाः**–(पटहध्वनिनोद्गायन्ति । नेपथ्ये पादाघातध्वनिः)

**(भूपालीरागेण दादरातालेन गीयते)**

भट्टा नदताट्टमेव
हर हर हर महादेव ।।
प्रकटयत कटप्रताप–
मरिकुलघटितोपताप–
हृष्टा नदताट्टमेव० ।।१।।
प्रबलराज्यमदविकार–
कुटिलपरकृतापकार–
रुष्टा नदताट्टमेव० ।।२।।

---

**अथ रणगीतं भट्टा इति ।** *** अत्र छेकानुप्रासः शब्दालङ्कारः ।

निशितशरकृपाणपात-
साधितरिपुकटकघात-
तुष्टा नदताट्टमेव० ।।३।।
विजयपटहपटुनिनाद-
पातितपरिपन्थिमाद-
जुष्टा नदताट्टमेव० ।।४।।

(निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **दूतभेद**नामा चतुर्थोऽङ्कः ।।

---

**इति श्रीछत्रपतिसाम्राज्यटीकायां सर्वाङ्गविद्योतन्यां दूतभेदनामा चतुर्थोऽङ्कः समाप्तः ।**

## पञ्चमोऽङ्कः ।

(ततः प्रविशतो गूढचरौ)

**प्रथमः**–नूनं वपुःप्रकर्षावलिप्तस्य यवनमातङ्गस्य वधेन समुपार्जितं लोकोत्तरं यशो देवेन ।

**द्वितीयः**–अर्जितं त्वेतत्प्राणसंशयेन ।

**प्रथमः**–अहो कथं नामैतत् ।

**द्वितीयः**–आलिङ्गनमिषेणासौ जाल्मो देवं कक्षान्तरे संपीडच्य यावदसिप्रहारेणास्य शिरो भेत्तुमुदयुङ्क्त तावदेव देवेन व्याघ्रनखैर्विपाटितमस्य बृहत्तुन्दम्। देवस्य शिरस्त्राणेन च विफलीकृतोऽस्य निस्त्रिंशप्रहारः । अत्रान्तरे साहाय्यार्थमाक्रोशतस्तस्य पूर्वकायो विच्छिन्नश्चण्डविक्रमैकरसेन धर्मावतारेण देवेन । तदानीमेव देवं प्रहर्तुमुद्यतस्तस्याङ्गरक्षको यमसदनं प्रेषितस्तानाजीवीरेण । ततश्च संकेतानुरोधेनाक्रम्य परास्तं बीजापुरेशसैन्यमस्मत्सेनापतिना नेताजीवीरेण।

**प्रथमः**–उप्तमनेन खलु साम्राज्यबीजं महाराजेन ।

**द्वितीयः**–अथ किम् । ततःप्रभृति युद्धे गृहीतमुक्ता यवनसैनिका अपि विहाय यवनेशं महाराजाश्रयमन्विष्यन्ति ।

**प्रथमः**–भवन्ति सर्वेऽपि न्यायप्रवृत्तस्य पक्षपातिनः ।

**द्वितीयः**–अनन्तरं च विजित्य पन्हाळाप्रभृतीन् यवनदुर्गान् जुन्नरप्रभृतींश्च मोगलदुर्गान् प्रवर्तितं तत्र धर्मचक्रं महाराजेन । ततश्च भावियवनाक्रमणमपेक्षमाणो देवो नानादुर्गसंरक्षणार्थं मन्त्रिणो नियुज्य स्वयं पन्हाळादुर्गमध्यास्त । अचिरेणैवावरुद्धोऽयं दुर्गराजः पञ्चविंशतिसहस्रदलसमन्वितेन यवनसेनापतिना । ततो महता नयप्रयोगेण प्रतार्य तं यवनसेनापतिमतीतायां तमस्विन्यां निशीथ एव निर्भिद्यावरोधकगणमल्पपरिजनः प्रस्थितो देवो विशालगडदुर्गम् ।

**प्रथमः**–अहं तावत्सुगुप्तेन वर्त्मना तत्रैवोपेत्य श्रावयामि देवं मोगलेशोदन्तजातम् ।

**द्वितीयः**–अहमपि प्रविश्य यवनदलमुपलभेय तत्सेनापतेश्चिकीर्षितम् ।

(इति निष्क्रान्तौ)

**विष्कम्भकः ।**

(ततः प्रविशति विशालगडदुर्गोपत्यकावस्थितः सपरिजनः शिवराजः)

**बाजीः**–देव, दिष्ट्या संप्राप्ता वयं विशालगडदुर्गपरिसरम् । पश्य

विशालवप्रोन्नतगण्डभित्ति–
दुराक्रमो हस्तमिताग्रमार्गः ।
दुर्गोत्तमोऽयं परिणद्धपार्श्वो
महेन्द्रमातङ्गनिभो विभाति ।।१।।

तत्सत्वरमेनमधिरोहतु भारतेन्द्रः ।

**शिवराजः**–(परितो विलोक्य) वीर

आसीन्नभो यद्विशदं समन्ता–
दाच्छादितं किं घनमण्डलेन ।

(विचिन्त्य ससंभ्रमम्)

एतद् ध्रुवं मामनुधावतां द्विषां
पादोद्धतै रेणुभिरस्ति धूसरम् ।।२।।

तदत्र यत्प्राप्तकालं तदस्माभिरविलम्बेनानुष्ठेयम् ।

**बाजीः**–देव नास्ति तवात्रौत्सुक्यकारणम् । यतः

दासस्तवायं करवालपाणिः
संबाधवर्त्मन्यकुतोभयः स्थितः ।
अल्पानुगैः शत्रुदलं निपातयन्
निरोत्स्यति द्राक् परिपन्थिसंचरम् ।।३।।

(दूरं विलोक्य ससंभ्रमम्) देव त्वरय त्वरय । संप्राप्तं यवनदलम् । अधिरुह्य

**विशालेति** । विशालौ वप्रौ एव उन्नतगण्डभित्ती *** । उपजातिवृत्तम् ।
**दासस्तवेति** । अत्र संक्षेपाख्यं लक्षणम् ।
**त्वरयेति** । अत्र विद्रवाख्यं संध्यङ्गम् ।



च दुर्गमावेदय मां पञ्चभिः शतघ्नीस्वनैस्तव तत्र सुखोपस्थितिम् । यावदहमेतानत्रैव प्रतिरुणध्मि ।

**शिवराजः**–वीर त्वामशरणमेवमुत्सृज्य कथमुत्सहे पदमपि पुरतः प्रक्रमितुम्।

**बाजीः**–देव नायमवसरो युक्तायुक्तविचारस्य ।

त्वदन्नपानादिविवर्धितोऽयं
भस्मीभवेच्चेदवने तवैव ।
तदास्य चर्मास्थिविनिर्मितस्य
देहस्य मन्ये कृतकृत्यतां पराम् ।।४।।

**शिवराजः**–धन्योऽसि मे भृत्यैकवीर । रक्षतु त्वां परदेवता ।

**अङ्गरक्षः**–इत इतो देवः

(उभौ सत्वरं परिक्रामतः)

**शिवराजः**–(स्वगतम्) यत्सत्यम्

राष्ट्रैकभक्तिप्रवणैः प्रगल्भैः
सत्त्वोच्छ्रितैरेव रणप्रवीरैः ।
उपासितः सद्य उपैति भूमिपः
स्वातन्त्र्यदेव्याः प्रणयस्य पात्रताम् ।।५।।

**अङ्गरक्षः**–एतद्दुर्गपालाधिष्ठितं विशालगडदुर्गस्य सिंहद्वारम् ।

(ततः प्रविशति सिंहद्वारावस्थितो दुर्गपालः)

**दुर्गपालः**–स्वागतं देवस्य।

**शिवराजः**–प्रथमं तावत्सूचयास्मदुपस्थितिं पञ्चभिः शतघ्नीविस्फूर्जितैः ।

**दुर्गपालः**–तथा ।

(इति यथादिष्टं कुरुते)

**शिवराजः**–(वामबाहुस्पन्दनं सूचयित्वा) अरे कोऽयं वैकृतागमः ।

तृणाय मत्वा निजजीवितं कृतं
प्राणान्तकष्टे मम येन रक्षणम् ।

वृकावृतस्येव गजस्य तस्य मे
भद्रे मनः संशयमेव गाहते ।।६।।

(प्रविश्य)

**सैनिकः**–(ससंभ्रमम्) देव हतो बाजीप्रभुः ।

**शिवराजः**–(निःश्वस्य) हा हताः स्मः । (सरोषम्) रे पाप शिद्दिहतक, कोऽयमपचारः ।

एकाकिनं समरवीरमिमं समेतै–
र्व्यापाद्य सैनिकगणैः क्व नु विक्रमस्ते ।

प्रिय भृत्यैकवीर,

आत्मार्पणेन तव पालयतो निजेशं
शुभ्रं यशस्तु परितो विततं त्रिलोक्याम् ।।७।।

अरे विस्तरेण श्रोतुमिच्छामि ।

**सैनिकः**–देवस्य प्रस्थानादनन्तरं समन्ततोऽभिपततोऽरातिनिवहान् खण्डशः कृत्वा पञ्चविंशतिक्षतनिःसृतरक्तरञ्जितगात्रेण प्रवीरेण रक्षितो दुर्गारोह–मार्गः । तदानीमसौ

आकृष्टभीषणकृपाणकरालपाणि–
श्छिन्नोत्तमाङ्गरिपुसैन्यकबन्धकीर्णम् ।
मार्गं निरुध्य सहसा समरप्रवीर–
श्चण्डप्रकोपहुतभुग्ज्वलितो विरेजे ।।८।।

**शिवराजः**–(स्वगतम्) अहो क्षत्रवीर एवं लोकोत्तरविक्रमेण त्वयाद्य रक्षितं धर्मराज्यम् ।

**सैनिकः**–एवं पराहते रिपुदले पापेन शिद्दिहतकेन शतघ्नीगोलकैर्विद्धः स देवस्य सुखोपस्थितिसूचकशतघ्नीस्वन एव दत्तावधानः स्वामिचिन्तापरो भूमौ निपपात।

**शिवराजः**–(सरोषम्) आः पाप कूटाभियोगनिस्त्रपक्षुद्र, अचिरेणैव त्वामशेषदुरितफलभागिनं करिष्यति शिवराजः ।

---

**आकृष्टेति ।** *** वसन्ततिलकावृत्तम् ।



**सैनिकः**–ततश्च समाकर्ण्य संकेतितं शतघ्नीस्वनं –'अहो संपन्नः स्वामिनियोगः। भगवति देहि मे शरणम्' –इति सहसोदीर्य स प्राणानजहात् ।

**शिवराजः**–(निःश्वस्य) क्षत्रैकवीर, विरला हि त्वादृशाः स्वामिभक्ताः ।

प्रारब्धकर्मवशगाः क्रमशो विकारान्
सर्वेऽनुभूय ननु कालवशं प्रयान्ति ।
नूनं स एव निजदेशनरेशभक्तो
धन्योऽस्ति यस्य निधनं ज्वलितं यशोभिः ।।९।।

अये दुर्गपाल भवतु राजोपचारेण मम वीरस्यान्त्यक्रिया । अद्यैवाहं तस्य राजभक्तस्य सप्तपुत्रान् ममाङ्गरक्षकपदे नियुञ्जे ।

(प्रविश्य)

**चरः**–विजयतां देवः । संप्रति देवं दुर्जयं मत्वा परावृत्तः ससैन्यः शिद्दिहतकः।

**शिवराजः**–भद्र त्वं तावद्यवनेशमुपेत्यावेक्षस्व तस्य भाविचिकीर्षितम् ।

**चरः**–तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**गूढचरः**–विजयतां देवः ।

**शिवराजः**–कथं प्रचलति दिल्लीशतन्त्रम् ।

**गूढचरः**–देव महानस्ति तत्र विपर्यासः ।

न्यायानुवर्तिनमसौ स्वगुरुं निगृह्य
राज्याधिरोहणमदास्तविवेकतत्त्वः ।
आशङ्क्य विश्वसिति नैव निजे परे वा
संबाधते प्रकृतिमात्तमहोग्रदण्डः ।।१०।।

संप्रति तदादेशानुरोधेनोद्यतो दक्षिणापथाधिपश्चाकणदुर्गोपरोधाय ।

**शिवराजः**–पुनरपि ज्ञायतां तस्य प्रवृत्तिः ।

---

**प्रारब्धेति ।** *** क्रमशो विकारान् – जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यति च – इति अनुभूय कालवशं प्रयान्ति म्रियन्ते इत्यर्थः *** । वसन्ततिलकावृत्तम् ।

**गूढचरः**–तथा ।

(इति निष्क्रान्तः)

**शिवराजः**–दुर्गपाल, प्रवर्त्यतामस्मच्छासनमधिकृतेषु यदुपस्थिते प्राणसंकटे जनपदं विहाय तैर्दुर्गाः समाश्रयणीया महता प्रयत्नेन च ते रक्षणीया इति । तथा चादिश्यतां मन्त्री यत्त्वया नौसाधनेन स्वायत्तीकर्तव्यो जंजीराद्वीप इति । तथैव सेनापतिनाप्यक्रमणीया अरक्षिता मोगलप्रदेशा इति । अल्पीयसा कालेनोपैष्यामो वयं सिंहगडदुर्गं तत्तत्रैव प्रेषणीयानि निवेदनपत्राणीति ।

**दुर्गपालः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

**शिवराजः**–मम वीराग्रसरेण परास्तमपि पुनरस्मान् परिबाधेत यवनसैन्यम् ।

**अङ्गरक्षः**–देव संनिहितो वर्षासमयः । तदुपस्थितमपि यवनसैन्यं स्वयमेव परावर्तिष्यते ।

**शिवराजः**–(परितो विलोक्य) एवमेतद् । यत एते

लुलितपथिकनेत्रे पूरयित्वा रजोभि-
र्वसनमपहरन्तो लुण्ठकाश्चक्रवाताः ।
जनपदपुरमार्गे संभ्रमन्तो यथेच्छं
वियदभि घनभीता उत्प्लवन्ते समन्तात् ।।११।।

(ऊर्ध्वं विलोक्य) अहो गगनमध्यमारुरुक्षति भगवानहर्पतिः । यावत्साधयामः सभागृहं राजकार्याण्यवेक्षितुम् ।

(इति सपरिजनो निष्क्रान्तः)

।। समाप्तोऽय**मात्मसमर्पण**नामा पञ्चमोऽङ्कः ।।

---

**लुलितेति ।** *** मालिनीवृत्तम् ।

**इति श्रीछत्रपतिसाम्राज्यटीकायां सर्वाङ्गविद्योतन्या-मात्मसमर्पणनामा पञ्चमोऽङ्कः समाप्तः ।**

## षष्ठोऽङ्कः ।

(ततः प्रविशन्ति सिंहगडदुर्गप्रासादावस्थिता मन्त्रिणः)

**नेताजीः**–(सहर्षम्) अभिनन्द्यते प्रधानमन्त्रिपदमधिरूढ आर्यमिश्रः ।

**मन्त्री**–वीर महानेषोऽनुग्रहः कृतवेदिनो महाराजस्य । परंतु

भोगप्रसक्तस्य महत्पदाप्ति-
र्यथात्मतोषाय न मे तथेयम् ।
देवेन साक्षात् परिचारकर्मणि
नियुक्त इत्येव मम प्रसादः ।।१।।

**नेताजीः**–पुण्यवतामेव खलु महत्सपर्यासौभाग्यम् ।

**मन्त्री**–अपि गृहीता अरक्षिता मोगलप्रदेशाः ।

**नेताजीः**–अथ किम् । ततश्च संगृहीतो लक्षत्रयपरिमाणो राजांशोऽद्यैव मया कोशाध्यक्षाय समर्पितः ।

**मन्त्री**–दिष्ट्या प्रतिदिनमेधते महाराजस्य कोशदण्डजः प्रभावः ।

**एसाजीः**–तथापि नास्ति देवस्य विश्रामावसरः । एकतस्तातादेशमनुरुध्य बीजापुरेशेन संदधानस्य पुनरन्यतः समुपस्थितो मोगलेशेन सह विग्रहः ।

**मन्त्री**–वीर लोकसंग्रहार्थमाविर्भूतानामीश्वराणां स्वभावसिद्धः प्रवृत्तिप्रकर्षः। पश्य

नित्यं प्रकाशयति लोकमिमं विवस्वा-
नाप्याययत्युपचितः सुधया मृगाङ्कः ।
सप्तग्रहास्त्वविरतं परितो भ्रमन्ति
जानाति नैव विरतिं महतां प्रवृत्तिः ।।२।।

(नेपथ्ये)

इत इतो देवः ।

---

**प्रधानमन्त्रीति ।** मोरोपन्तपिंगळेनामा ।

(आकर्ण्य) अहो, अत्रैवोपसर्पति राजकार्यव्याकुलो देवः ।

(ततः प्रविशति शिवराजः)

**मन्त्रिणः**–(उत्थाय) स्वागतं देवस्य ।

(सर्वे शिवराजमनूपविशन्ति)

**शिवराजः**–मन्त्रिणः पुनरपि प्रत्यासन्नो विग्रहः ।

विरोधे विश्रान्ते प्रबलयवनेशस्य परितो
नवोऽयं संप्राप्तस्तदधिकबलैर्विग्रहविधिः ।
पतन्त्येते नित्यं किमिति तिमिरान्धा रिपुगणाः
पतङ्गत्वं प्राप्ताः समरसमुदर्चिर्हुतवहे ॥३॥

**मन्त्री**–देव समादृतोऽस्त्यचिरेण मदोद्धतेन मोगलेशेन परंपरागतराज्यशासनव्यतिक्रमः । अनेन पुनरकाण्डोपनतो भविष्यति मोगलसाम्राज्यविध्वंसः । यतः

सत्त्वोद्रेकाल्लसन्तोऽप्युदितनयगुणा न्यायमार्गप्रवृत्ता
यान्त्युत्कर्षं नरेन्द्राः प्रकृतिहितपरा मण्डलं प्रीणयन्तः ।
अन्ये त्वेतद्विमोहाद् व्यसनपरवशा विद्विषन्तो मदान्धाः
प्रत्यासन्नावसानाः प्रकृतिविमृदिता आशु नाशं व्रजन्ति ॥४॥

**शिवराजः**–सत्यं प्रकृतिनिबन्धनैव राष्ट्रसमृद्धिः ।

(प्रविश्य)

**द्वारपालः**–विजयतां देवः । दिल्लीनगरात् संप्राप्तः कोऽपि यवनतापसो द्वारि तिष्ठति ।

**शिवराजः**–प्रवेशयैनम् ।

**द्वारपालः**–तथा ।

(इति निष्क्रान्तः)

---

**विरोध इति ।** *** अयं नवो विग्रहविधिः संप्राप्तः । तिमिरान्धा मोहावृत्ता *** । शिखरिणीवृत्तम्।

**सत्त्वोद्रेकादिति ।** ***मण्डलं सामन्तचक्रम् । स्रग्धरावृत्तम् ।



(प्रविश्य)

**यवनतापसः**–विजयतां महाराजः ।

**शिवराजः**–अस्ति काचित् सविशेषा प्रवृत्तिर्मोगलेशस्य ।

**यवनतापसः**–देव विपर्यस्तं सर्वं मोगलेशतन्त्रम् ।

न मन्यते मन्त्रिकृतार्थनिर्णयं
क्षत्रेश्वराणां कुरुतेऽवधीरणाम् ।
विद्वेष्टि सामन्तगणं त्वकारणं
स्वच्छन्दचारेण चरत्यधीश्वरः ॥५॥

अतो राज्यलोभाकृष्टेनानेन समन्तात् प्रवर्तितो रणोद्यमः । अत्रान्तरे तस्य श्रवणपथमुपगतो बीजापुरसेनापतिवधोदन्तः । तदेतत्

श्रुत्वा तव प्रसभमाक्रमणं विपक्षे
त्रस्तो व्युदस्यति स भोगविलासलौल्यम् ।
आक्रोशति स्वजनमुद्विजते हतौजा
आशङ्कतेऽभिपतनं तव विक्लवश्च ॥६॥

अतस्तेनादिष्टो दक्षिणापथाधिपो यत्त्वया कथमपि निगृह्यात्रानेतव्यः स सह्यमूषक इति । तदाज्ञानुरोधेनापरिमितबलसमेतः स पुनानगरमधिष्ठायास्मदाक्रमणमुपकल्पयते । संप्रति च सपरिवारः स नर्तकीभिरुपासितो महाराजस्य प्रासाद एव निवसति ।

**शिवराजः**–अन्यतो युद्धप्रवृत्तेष्वस्मास्वनेन धूर्तेन प्रधर्षिताऽस्मद्राजधानी । इदानीमयं कामुकः

देवाग्निविप्रार्चनमन्त्रपूतं
पूर्वं यदासीन्मम राजमन्दिरम् ।
करेणुकाभिर्वनराजगह्वरं
करीव तन्मे मलिनीकरोति ॥७॥

तदद्य तं प्रदर्शयिष्यामि मम नयपाटवम् ।

**मन्त्री**–देव सम्यक् प्रयुक्ता अप्यस्मिन् कोशबलसमृद्धे कुण्ठीभविष्यन्ति

सामादयश्चत्वार उपायाः । तत्पञ्चमोपायमन्तरेण नास्ति किमप्यत्र प्रतिविधानम् । यतः

एकान्तेनैवाप्रधर्ष्यं बलाढ्यं
दुःसंधानं चान्तिके वर्तमानम् ।
यत्नेनैनं विद्विषन्तं निगृह्य
स्वात्मानं वै रक्षयेन्नीतिदक्षः ।।८।।

अपिच सेनान्यधीनैव सर्वा समरप्रवृत्तिः । यतः

यानासने व्यूहविधानमाक्रमं
परावरोधं समरावतारम् ।
युद्धे प्रवृत्तिं विरतिं ततः पुन-
र्नेता स्ववीर्यानुगुणं चिकीर्षति ।।९।।

तन्नेतृवधेन विरतो भविष्यति रणोद्यमः परिरक्षिताश्च भविष्यन्त्युभयतः सैनिकानां प्राणाः ।

**शिवराजः**–तदद्यैवानुयात्रिकच्छद्मना प्रविश्य पुनानगरमासादयिष्ये मोगलसेनानायकम् ।

भीष्मद्रोणादयः पूर्वे सेनान्यः पाण्डुनन्दनैः ।
छलेनैव हता युद्धे श्रीपतेरनुशासनात् ।।१०।।

(चरं प्रति) भद्र उच्यतां मद्वचनाद्यवनसेनानियुक्तो महाराष्ट्रियो गुल्माध्यक्षो यत्त्वयाऽद्यैव विवाहयात्रार्थं संपादनीयं मोगलसेनापतेरनुज्ञापत्रम् । तत्रच्छद्मवेषधरा वयं भविष्यामस्तेऽनुयात्रिका इति ।

**यवनतापसः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

**शिवराजः**–अस्मिन् साहसोपक्रमे केवलं पञ्चविंशतिसैनिकसमेतावमात्यपदातिनायकौ भवतां मम पार्श्वानुवर्तिनौ ।

**उभौः**–देव सज्जौ स्वः ।

**शिवराजः**–सेनापते त्वं तावत्संनाहय शतघ्नीविभागम् ।



**नेताजीः**–यदाज्ञापयति देवः ।

**मन्त्री**–अत्रावशिष्यते देवस्य प्रत्यागमनप्रत्यूहनिवारणाय कापि विशिष्टा प्रयुक्तिः। तद् देवस्य परावृत्तिसमये गृहीतसंकेताः कतिपयसैनिकाः प्रज्वालयन्तु कात्रजवर्त्मनि समुन्नतपादपविटपाग्रेषु महोक्षशृङ्गेषु च निबद्धांस्तैलकर्पटान् । अनेन भ्रान्ता मोगलसैनिकास्तत्रैवानुधावेयुः ।

**शिवराजः**–अहो सुविभावितोऽयं छलप्रबन्धः । एवं भविष्यति सर्वेषां पुनरत्र सुखोपस्थितिः । तद्भवतां प्रयाणाभिमुखौ मे प्रियसहायौ । यावदहमम्बामामन्त्र्य प्रस्थानप्रवणो भवेयम् ।

(निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **छलप्रबन्ध**नामा षष्ठोऽङ्कः ।।

---

**कात्रजवर्त्मनीति ।** कात्रजनामा शैलारोहः ।

**इति श्रीछत्रपतिसाम्राज्यटीकायां सर्वाङ्गविद्योतन्यां छलप्रबन्धनामा षष्ठोऽङ्कः समाप्तः ।**

## **सप्तमोऽङ्कः ।**

(ततः प्रविशतो मोगलसेनामुखाध्यक्षौ)

**प्रथमः**–भद्र सेनाधिपतौ कोऽयमसाधारणः सार्वभौमस्य पक्षपातो येनासौ स्वाम्यधिकारानपि स्वयं स्वातन्त्र्येणोपभुङ्क्ते ।

**द्वितीयः**–अये किं न जानासि प्राग्वृत्तम् ।

**प्रथमः**–स्वामिनियोगानुरोधेनाद्यैवाहं गान्धारेभ्योऽत्र संप्राप्तः ।

**द्वितीयः**–तच्छृणु सावधानः । पूर्वं दक्षिणापथाधिपत्ये स्थापितस्य सार्वभौममातुलस्य प्रासादं गाढान्धकारावृतायां रजन्यां प्रच्छन्नं प्रविश्य शिवराजेनोच्छिन्नास्तस्य भयद्रुतस्य कराङ्गुल्यः । अत्रान्तरे चाकर्ण्य तदाक्रोशं साहाय्यार्थमुपागतस्तदात्मजः शिवराजपार्श्वचरेण सैनिकैन यमालयं प्रेषितः । ततः सरभसं विनिवृत्तं शिवराजमनुद्रुतं मोगलसैन्यं कात्रजवर्त्मनि दीपप्रकाशमवलोक्य तत्रैव प्रयातम् । तत्र च शिवराजमदृष्ट्वा भग्नाशं परावृत्तम् । एतच्छलप्रबन्धप्रवृद्धमन्युना दक्षिणापथाधिपेन प्रत्यूषे समवरुद्धः सिंहगडदुर्गः । तदानीं दुर्गाधिरूढेन शिवराजेन शतघ्नीप्रहारैः परास्तं तदवरोधकबलम् । निशम्यैतत् खिन्नः सार्वभौमः स्वमातुलं वङ्गाधिपत्ये नियुज्य समरविजयिनं जयसिंहमहाराजं स्वाम्यधिकारेण संयोज्य शिवराजं सत्वरं निग्रहीतुमत्र प्रेषयामास । संप्रति चास्मन्महाराजनयवशंवदेन शिवराजेन प्रेषितो रघुनाथपन्तो महाराजेन सह मन्त्रयमाणस्तिष्ठति । शिवराजश्च स्वयं संधिनिर्णयार्थमित एवाभिवर्तते ।

**प्रथमः**–नास्ति किमप्यसाध्यं सर्वत्र विजयशालिनः सार्वभौमनिष्ठस्य जयसिंहमहाराजस्य । (ऊर्ध्वं विलोक्य) अहो परिणतप्रायो हि दिवसः । यावत्साधयामः स्वनियोगपरिपालनाय ।

(इति निष्क्रान्तौ)

**विष्कम्भकः ।**



(ततः प्रविशति जयसिंहसेनानिवेशमभि प्रस्थितः सपरिजनः शिवराजः)

**जगन्नाथपन्तः**–(परितो विलोक्य) देव पश्य,

वक्रा इमे तरुलतास्तबकैः सुगुप्ता
निम्नोन्नता विकटशाद्वलशैलमार्गाः ।
आयाससाध्यकुटिलाक्रमपाटवे नः
शिक्षाविशेषमसमं वितरन्ति साक्षात् ।।१।।

**शिवराजः**–सत्यं शैलोद्देशसंक्रमणपाटवेऽतिवर्तन्ते मोगलसैनिकानस्मत्सैनिकगणाः । येनाल्पबला अपि वयं प्रबलपरिपन्थिनां पुरतो धर्मराज्यसंस्थापनयशोभागिनः संवृत्ताः ।

**जगन्नाथपन्तः**–एवमेतत् । अपिच

उच्चावचाचलभुवो गिरिगह्वराणि
नानालतातरुवराश्रितकाननानि ।
उत्तुङ्गशैलशिखरस्रुतनिर्झराणि
दुर्गात्मना तव परस्य च संस्थितानि ।।२।।

**शिवराजः**–एतैर्दुर्गप्रवरैरेवाद्यावधि रक्षितमस्मत्स्वातन्त्र्यम् । परंतु कालमहिम्ना संप्रति तानेवाहुतीकर्तुं वयं प्रवृत्ताः । तथाप्यनुकूले दैवे पुनस्त एव भविष्यन्त्यस्मत्स्वातन्त्र्यसहायाः ।

**जगन्नाथपन्तः**–तत्र कः संदेहः । सर्वत्रैव सान्तरायोऽस्ति प्रकृष्टकलाधिगमः। परंतु कर्तव्यनिष्ठाया अविच्युतानां भवन्ति सर्वेऽपि परिणामसुखोदया उपक्रमाः ।

**शिवराजः**–भद्र, अथ कियद्दूरं वर्तते मोगलसेनानिवेशः ।

**जगन्नाथपन्तः**–देव पश्यैतेऽस्मत्तुरंगमाः

---

**वक्रा इति ।** *** वसन्ततिलकावृत्तम् ।

**उच्चावचेति ।** *** एतानि सर्वाणि तव दुर्गात्मना दुर्गरूपेण परस्य च दुर्गात्मना अन्तरायरूपेण स्थितानि । वसन्ततिलकावृत्तम् ।

**तानेवाहुतीकर्तुमिति ।** अत्र विमर्शसन्ध्यारम्भः । तल्लक्षणं दर्पणे ‘यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः । शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः ।।’ इति ।

संक्रम्य गुप्तान् विषमाद्रिमार्गा-
नुत्तीर्य विस्तीर्णजलप्रवाहान् ।
प्रवातवेगेन समुत्पतन्तः
प्राप्ताः क्षणेनोच्छ्रितशैलवप्रम् ।।३।।

**शिवराजः**–उपागता वयं तावत् पुरन्दरपरिसरप्रदेशम् । (दूरं विलोक्य सविस्मयम्) अहो किं नामैतत् । पश्य

आच्छाद्येवोष्णरश्मिं निजघनततिभिर्ध्वान्तमापादयद्भि-
र्हृन्मर्मोद्भेदिनादैः स्तनितपटहजैर्गर्वमाघोषयद्भिः ।
धारासंपातभग्नप्रतिभटविटपिव्याकुलोपत्यकान्त
आक्रान्तो म्लेच्छसैन्यैर्जलधरनिवहैर्दुर्गराजः समन्तात् ।।४।।

**जगन्नाथपन्तः**–देव, अवरुद्ध इव लक्ष्यते पुरन्दरदुर्गो मोगलसैनिकैः ।

**शिवराजः**–अरे किमिदं द्वैधप्रवणत्वं यवनसेनापतेः । यदेकतः संधानतन्त्रमुपन्यस्यान्यतोऽसौ विग्रहमनुजानाति ।

**जगन्नाथपन्तः**–देव कथं नु संभाव्यत एतत्क्षत्रप्रवीरस्य जयसिंहस्य । किंत्ववधीरितसेनापतिनिदेशस्य मोगलपदातिनायकस्य स्यादेतदनार्यचेष्टितम् । यतः

राज्ञां प्रिया बहुमता व्यसने सहाया
विस्रम्भभूमय इमे परिपार्श्वगाश्च ।
संतर्ज्य शासनमपि स्वपतेर्मदान्धाः ।
क्षुद्रा अरण्यवृषवद्विचरन्त्यतन्त्राः ।।५।।

**शिवराजः**–(अश्ववेगं निरुध्य) एष कोऽपि क्षत्रियसादी सवेगमित एवाभिवर्तते।

(ततः प्रविशति क्षत्रियसादी)

---

**आच्छाद्येति** । निजघनततिभिरुष्णरश्मिं सूर्यं पक्षे दुर्गपालं मुरारबाजीवीरमाच्छाद्येव ध्वान्तमन्धकारमापादयद्भिः कुर्वद्भिः स्तनितानि एव पटहाः तेभ्यः जातः पक्षे स्तनितानि इव पटहाः तेभ्यः जातैः हृदः हृदयस्य मर्माणि भिन्दन्ति तादृशैः नादैः गर्वमाघोषयद्भिः धारासंपातैः आसारैः पक्षे असिधारासंपातैः भग्नाः ये प्रतिभटाः एव विटपिनः पक्षे प्रतिभटाः इव विटपिन वृक्षाः तैः व्याकुलः व्यग्रः उपत्यकान्तः उपत्यकाप्रदेशः यस्य स दुर्गराजः पुरन्दरदुर्गः म्लेच्छसैन्यरूपैः जलधरनिवहैः पक्षे जलधरनिवहरूपैः म्लेच्छसैन्यैः समन्तात् आक्रान्तः । स्रग्धरावृत्तम् ।



**सादी**–(ससंभ्रमम्) देव, महदत्याहितम् । मोगलपदातिनायकेनोपजापितोऽपि स्वामिचरणयोरात्मनः परां निष्ठां प्रकटयन् शतशो मोगलसैनिकान्निहत्य वीरगतिं प्रपन्नः पुरन्दरदुर्गपालः ।

**शिवराजः**–हा कष्टम् । उपक्रान्तमिव लक्ष्यते दुर्दैवविचेष्टितम् ।

**सादी**–तस्य चालोकसाधारणविक्रमविस्मितेन मोगलनायकेन तदानीं सहसैवोदीरितं – 'विश्वपतिरेवैतादृशान्वीरभटानुत्पादयितुं प्रभवति'–इति ।

**शिवराजः**–अहो पराभिनन्दितविक्रमस्य तस्य निश्चितोऽनन्तलोकजयः । अये गच्छ त्वं पुनरपि पुरन्दरदुर्गम् ।

**सादी**–यथाज्ञापयति देवः ।

(इति निष्क्रान्तः)

**शिवराजः**–भद्र नास्त्यत्रावकाशो विलम्बस्य ।

(इति सर्वेऽश्वान्नोदयन्ति)

(ततः प्रविशत्यपटीक्षेपेणाश्वारूढ उदयसिंहः)

**उदयसिंहः**–सह्येश्वर, तिष्ठ तावन्मुहर्तम् ।

**शिवराजः**–(अश्वं निगृह्य) अहो उदयसिंहः । अप्यनामयं महाराजस्य ।

**उदयसिंहः**–अथ किम् । अपि च संदिष्टमस्ति देवेन यद् – मदादेशानुवर्तननिष्ठापुरःसरं यदि तवागमनं स्यात्तदा सुखेनागन्तव्यम् । अन्यथा त्वित एव विनिवर्तनीयम्–इति ।

**शिवराजः**–सर्वथा मान्य एवास्माकं क्षत्रकुलनायकस्यादेशः तत्सत्वरमुपेमो महाराजस्य शिबिरम् ।

(सर्वेऽश्वान्नोदयन्ति)

**उदयसिंहः**–सह्येश्वर, प्रत्यासन्नोऽस्मत्सेनानिवेशः । तदश्वेभ्योऽवरुह्य प्रविशामः।

(इति सर्वेऽवरोहन्ति)

(ततः प्रविशत्युपकार्यावस्थितः सपरिवारो जयसिंहो रघुनाथपन्तश्च)

**रघुनाथपन्तः**–(दूरं विलोक्य) एष उपस्थितोऽस्मत्स्वामी शिवराजः । यावत्तं प्रत्युद्गच्छामि ।

(इत्युपसर्प्य) स्वागतं देवस्य । (इत्यभिनन्दति)

प्रविशतु देवः सपरिवारो महाराजोपकार्याम् ।

(इति सपरिवारं शिवराजं प्रवेशयति)

**जयसिंहः**–(अभ्युत्थाय) स्वागतं सह्येश्वरस्य । (इति हस्तयोर्गृहीत्वा) ममैवार्धासनमधिष्ठातुमर्हति सह्येश्वरः ।

(इति स्वपार्श्वे शिवराजमुपवेशयति)

**शिवराजः**–महानेषोऽनुग्रहः क्षत्रकुलमण्डनस्य ।

**जयसिंहः**–अप्यनामयं क्षत्रप्रवीरस्य ।

**शिवराजः**–राजन् संधानप्रवणेऽपि मयि कथं क्षत्रपरिमर्दान्न विरमत्येष पदातिनायकः।

**जयसिंहः**–सार्वभौमस्य बहुमानेनावलिप्तोऽयं त्वया स्वयमेवोपेत्य सान्त्वयितव्यः । एष प्रवीरतरो मम पितृव्यः सुभानसिंहो भविष्यति तव सहायः । तन्मा भूल्लेशतोऽप्यत्र तवानिष्टशङ्कावकाशः । संप्रति प्रेषयाम्यहमुदयसिंहं युद्धविष्टम्भाय।

**शिवराजः**–राजन्, त्वद्वात्सल्यपरिगृहीतोऽहं सर्वथा प्रतिपद्ये तव हितोपदेशम्।

**जयसिंहः**–पूर्व तावद्विधीयतां स्वनाममुद्राङ्कितमेतत्संधिपत्रम् ।

(इत्यर्पयति)

**शिवराजः**–(वाचयति)

श्रीमद्भारतराजकुलाधीश्वरसार्वभौममोगलेशचरणरचिताञ्जलिः शिवराजः,

१. स्वकीयांस्त्रयोविंशतिदुर्गांश्चत्वारिंशल्लक्षांशवहांश्च जनपदान् सार्वभौमस्य स्वाधीनानापादयति । स्वयं चावशिष्टान् द्वादशदुर्गांश्चतुर्लक्षांशवहांश्च जनपदान् सार्वभौमशासन-मनुरुध्यानुशास्ति।

२. स्वकुमारं च सार्वभौमसेनायां पञ्चसहस्रसादिनामधिकारपदे स्थापयति।

३. स्वयं च सार्वभौमशुश्रूषायां सर्वदा सादरो वर्तते ।

४. स्वयं च संनिहितराज्ययोश्चतुर्थांशसंग्रहाधिकारं



सार्वभौमाज्ञयोपभुनक्ति।

इति । (स्वनाममुद्राङ्कितं विधाय) उररीक्रियते मयैतत्संधिपत्रम् ।

(इत्यर्पयति)

**जयसिंहः**–सह्येश्वर परं प्रीणयसि मां तव सौजन्यातिशयेन । उदयसिंह, उच्यतां मद्वचनात्पदातिनायको यद्युद्धव्यवसायतस्त्वं सद्यो विरमेति ।

**उदयसिंहः**–यथाज्ञापयति देवः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**प्रतीहारः**–विजयतां देवः । एष सार्वभौमस्य संदेशहरः कोऽपि दूतो द्वारि तिष्ठति ।

**जयसिंहः**–प्रवेशयैनम् ।

**प्रतीहारः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**दूतः**–विजयतां महाराजः ।

**जयसिंहः**–अप्यनामयं सार्वभौमस्य ।

**दूतः**–अथ किम् । प्रेषितमेतद्राजशासनं महार्हवस्त्राभूषणपुरःसरं सार्वभौमेण शरणमुपागते शिवराजे वितरितुम् ।

(इति राजशासनादीन्यर्पयति)

**जयसिंहः**–(सविस्मयं स्वगतम्) अहो भवितव्यता । (वाचयित्वा) सह्येश्वर दिष्ट्याऽनवलोकितमप्यभिनन्द्यते सन्धिपत्रं सार्वभौमेण बहुमन्यसे च त्वं महार्होपचारैः।

**शिवराजः**–राजनीतिदक्षे महाराजे मन्त्रिसेनापतिपदाधिरूढे सहैवोपक्रमेणार्थसिद्धिः सार्वभौमस्य ।

**जयसिंहः**–कः कोऽत्र भोः ।

(प्रविश्य)

**प्रतीहारः**–आज्ञापयतु देवः ।

**जयसिंहः**–आराधयन्तु संगीतेन सह्येश्वरं नर्तक्यो यावदहमेनं संभावयामि महार्होपचारैः ।

**प्रतीहारः**–तथा ।

(इति निष्क्रान्तः)

**जयसिंहः**–वत्स शिवराज उत्तिष्ठ ।

(इति वस्त्रादीनि परिधापयति)

(प्रविश्य)

**नर्तक्यः**–विजयतां महाराजः ।

(इति संगीतमारभन्ते)

**(बिहागरागेण तेवरातालेन गीयते)**

सुमसुकुमार नयनविहार ।।
हृदयाधार यौवनसार ।
प्रणयापारपारावार ।। सुम० ।।१।।
जलदश्याम धर सुखधाम ।
कुसुमललामचम्पकदाम ।। सुम० ।।२।।
अयि भुवनेश मानववेश ।
रमय रमेश मां रसिकेश ।। सुम० ।।३।।

**जयसिंहः**–अनया चम्पकमालया सुबद्धं भवतु ते हृदयं मोगलसाम्राज्येन ।

(इति मालामर्पयति)

**शिवराजः**–राजन् भवादृशैर्भारतवीराग्रसरैः क्षुण्ण एव पन्था अस्माकं परमं शरणम् ।

**जयसिंहः**–अल्पीयसा कालेन नूनं भविष्यति तव सार्वभौमसमागमसौभाग्यम्। तत्र च करिष्यति ममात्मजो रामसिंहस्तव साहाय्यम् । तदानीं तवालोकसाधारणविक्रमपरितुष्टो मोगलेशो नियोजयिष्यति त्वां दक्षिणापथाधिपत्ये ।

**शिवराजः**–महाराजस्य वचसि वर्तमानस्य ममोत्तरोत्तरमुत्कर्ष एव ।

**सुमसुकुमारेति ।** *** कृष्णं प्रति राधायाः प्रार्थनारूपमिदं गेयपदम् । अत्रान्त्यानुप्रासः शब्दालङ्कारः।



**जयसिंहः**–क्षत्रप्रवीर, त्वादृशानां विक्रमशालिनां साहाय्येन समीहते सार्वभौमः साम्राज्यप्रभावं समेधयितुम् ।

**शिवराजः**–भवादृशैः क्षत्रेश्वरैः समृद्धे साम्राज्ये का गणना मम साहाय्यस्य। किंतु महाराजस्य प्रसादात् सार्वभौमसपर्याप्रसङ्गोदयेनात्मानमहं कृतिनं मन्ये ।

**जयसिंहः**–(ऊर्ध्वं विलोक्य) अहो, उपक्रान्तो निशीथसमयः । कः कोऽत्र भोः ।

(प्रविश्य)

**प्रतीहारः**–आज्ञापयतु देवः ।

**जयसिंहः**–अन्तर्गृहमार्गमादेशय । (शिवराजं प्रति) एहि सह्येश्वर ।

**प्रतीहारः**–इत इतो देवः ।

(सर्वे परिक्रामन्ति)

**शिवराजः**–(स्वगतम्) अहो कथमद्यापि साशङ्कमेव वर्तते मे मनो मोगलाधीश्वरे। यद्

आजन्मनो जनमिमं द्विषताऽधमेन
साम्राज्यवैभवमदोद्धतमानसेन ।
स्वातन्त्र्यमन्यनृपतेरसहिष्णुना मे
संमाननं किमु कृतं प्रविलोभनार्थम् ।।६।।

**प्रतीहारः**–एतदन्तर्गृहद्वारं प्रविशतु देवः सह्येश्वरश्च ।

(इति निष्क्रान्तः)

(प्रविश्य सुवर्णमञ्चावधिरुह्य)

**जयसिंहः**–क्षत्रवीर तव सामोपचारप्रवणतयाऽतीव संतुष्टोऽस्मि ।

**शिवराजः**–राजन्, अस्थानेऽपि शङ्काकुलं मे मनो मां मुखरयति यत्कथमलोकसाधारणविक्रमाः साक्षाद्विजयमूर्तयो भवादृशा अपि सानन्दमङ्गीकुर्वन्ति मोगलेशानुगत्वम् ।

**जयसिंहः**–वत्स कालचक्रपरवशा हि सर्वे प्राणिनः । संप्रति हीनगुणानां

**आजन्मन इति ।** *** वसन्ततिलकावृत्तम् ।

क्षत्राधिपानां गुणोत्कर्षेणारूढप्रतापस्य मोगलान्वयस्य सपर्यामन्तरेण न विद्यतेऽन्यदालम्बनम् । तद्यावदेते न भवन्त्यन्तराया अस्मद्धर्मानुष्ठानेषु तावत्संमाननीयाः। तथापि सांप्रतं सम्राट्पदमारूढेन मोगलेशेन परधर्मविद्वेषपरेणोप्तमेव साम्राज्यविध्वंसबीजम्! अहो बत यद्भावि तत्केन निवार्यते । पूर्वसम्राडनुग्रह-परंपरावशीकृतैरस्माभिस्तु कृतज्ञतयाऽनुष्ठीयते भृत्यधर्मः ।

**शिवराजः**-राजन्, अन्यथा खलु मे प्रत्ययः । यतः

स्वामिनं तु निजधर्मविच्युतं
सेवकः परिहरन्न दोषभाक् ।
अग्रजं हि परदारलोलुपं
व्यावृणग् गुणनिधिर्विभीषणः ।।७।।

**जयसिंहः**-अहो क्षत्रवीर, एवं धर्मतत्त्वख्यापनेन व्यामोहयसीव मे मनीषाम्। तथाप्यस्माकं तु पूर्वैरुपहत एव वर्त्मनि नैसर्गिकः पक्षपातः । (ऊर्ध्वं विलोक्य) अहो निशीथकल्पा हि रजनी । यावद्रात्रिकृत्यानि परिसमाप्य शयनमारोहावः ।

(इति निष्क्रान्तौ)

।। समाप्तोऽयं **मोगलेशानुसंधान**नामा सप्तमोऽङ्कः ।।

---

**स्वामिनमिति ।** निजधर्मविच्युतं स्वामिनं तु परिहरन् त्यजन् सेवकः दोषभाक् न भवति । हि यस्मात् गुणनिधिः विभीषणः परदारेषु लोलुपमतिशयेन लुब्धं अग्रजं रावणं व्यावृणक् अजहात् । रथोद्धतावृत्तम्। अर्थान्तरन्यासोऽलंकारः ।

**इति श्रीछत्रपतिसाम्राज्यटीकायां सर्वाङ्गविद्योतन्यां**
**मोगलेशानुसंधाननामा सप्तमोऽङ्कः समाप्तः ।**

## अष्टमोऽङ्कः ।

(ततः प्रविशति निजोपवनप्रासादावस्थितः रामसिंहः)

**रामसिंहः**-(स्वगतम्) अहो नानानयप्रयोगपटुनाऽपि शिवराजेन पितृनयवशंवदेनाभिनन्दितं मोगलेशानुसन्धानम् । तन्निदेशवर्तिना चानेनापहाय स्वमानमाराध्य च मोगलपदातिनायकं तस्मै समर्पिताः पुरन्दरप्रभृतयो दुर्गप्रवराः । स्थापितश्च निजयुवराजो मोगलसेनायामधिकारपदे । इतः पित्रैव दत्ताभयोऽसौ मन्त्रिविनिहितराज्यभरः सार्वभौमसमागमार्थमत्र संप्राप्तः संप्रति केवलमौत्सुक्येन कालं यापयति । इतश्च निजमातुलान्याक्रन्दाक्षिप्तहृदयो मोगलेशः पूर्ववत्तस्मिन् सविशेषभावो न लक्ष्यते । निजाज्ञयैव मोगलयुवराजवद्वर्त्मनि प्रतिनिवेशं संभावितस्यास्य तु सामन्तसाधारणोपचारपराऽत्र सत्क्रिया केवलं संधुक्षयिष्यति निर्वाणभूयिष्ठं पूर्वं वैरानलम्। अहो धिगिमामनवस्थितिं लोकपालानाम् । यत्-

पार्श्वस्थानुचरोपजापमुषिता न्यक्कुर्वते सुव्रतान्
दुर्वृत्तानपि चाटुवादविजिताः श्लिष्यन्ति प्रेम्णाधमान् ।
मिथ्योत्सेकहृता द्विषन्ति च हितान् संतर्जयन्त्यूर्जितान्
दोलाचञ्चलचित्तवृत्तय इमे त्वाराधनीयाः कथम् ।।१।।

(पुरतो विलोक्य) एष परिसमाप्य प्रसाधनविधिमुपस्थितः सह्येश्वरः ।

(प्रविश्य)

**शिवराजः**-दिष्ट्याद्य भविष्यति चिरप्रार्थितः सार्वभौमसमागमः ।

**रामसिंहः**-अथ किम् । परंत्वपरिचिताः सन्त्येते मोगलेश्वरा आर्यसमुदाचारस्य। तन्महाराजेनोपेक्षणीयस्तेषामाचारातिक्रमः ।

---

**पितृनयेति ।** पितुः जयसिंहस्य नयः तस्य वशंवदेन अधीनेन ।

**पार्श्वस्थेति ।** पार्श्वस्थानामनुचराणामुपजापेन तत्कृतभेदनेत्यर्थः मुषिताः अपहृताः इमे नराधिपाः सुव्रतान् न्यक्कुर्वते तिरस्कुर्वन्ति चाटुवादैः मिथ्यास्तुतिभिः विजिताः वशीकृताः दुर्वृतानधमानपि प्रेम्णा श्लिष्यन्ति तेषु विश्वसन्तीत्यर्थः । मिथ्या उत्सेकेन गर्वेण हृता हितान् द्विषन्ति ऊर्जितान् बलिनश्च संतर्जयन्ति अवगणयन्ति। दोलावत् चञ्चला चित्तवृत्तिः येषां ते इमे तु कथमाराधनीयाः । शार्दूलविक्रीडितं वृत्तम् ।

**शिवराजः**–कुमार, सम्यक् परिचितोऽस्मि यवनसमुदाचारस्य ।

(प्रविश्य)

**द्वारपालः**–विजयतां कुमारः । जातः खलु सार्वभौमसभोपासनसमयः ।

**रामसिंहः**–साधयामस्तावत् । भद्र आदेशय सार्वभौमप्रासादमार्गम् ।

**द्वारपालः**–इत इतो देवौ ।

(सर्वे परिक्रामन्ति)

**शिवराजः**–(पुरं निर्वर्ण्य) अहो

ललिततरुवितानैर्मण्डिता राजमार्गैः

स्फटिकविमलभासैः सौधवासैः समृद्धा ।

यवनजवनयानैः संकुलेयं विशाला

विविधविपणिपण्या राजते राजधानी ।।२।।

**रामसिंहः**–महाराज किं बहुना । साक्षाद् विलासभूमिरेषा विलासिनां मोगलराजकुलेश्वराणाम् ।

**द्वारपालः**–एते संप्राप्ता वयं सार्वभौमसभामण्डपद्वारम् । तत्प्रविशतां देवौ।

(इति निष्क्रान्तः)

(ततः प्रविशति सभामध्यवर्ती मयूरासनस्थः सार्वभौमः)

**वीणिनौ**–(वीणावाद्येन गायतः)

**(कर्णाटरागेण झम्पातालेन गीयते)**

लताकुञ्जलीना ।।

तृणाङ्के शयाना स्वबाहूपधाना ।

स्वयं वीतमाना प्रिये सावधाना ।

शुचा विह्वला ते नवीना निलीना ।। लता० ।।१।।

पदं ते लपन्ती वियोगे तपन्ती ।

मुखं स्नापयन्ती तनुं ग्लापयन्ती ।

रुजा क्षीयते कान्तहीना निलीना ।। लता० ।।२।।

---

**ललितेति ।** *** मालिनीवृत्तम् ।

**लतेति ।** राधाप्रयुक्ताया दूत्याः कृष्णं प्रतीयमुक्तिः । *** अत्रान्त्यानुप्रासः शब्दालङ्कारः ।



अवस्थानमन्ते प्रियाया वरं ते ।

विलम्बेऽशुभं तेऽनुतापो दुरन्ते ।

क्षणं याचते नाथ दीना निलीना ।। लता० ।।३।।

**शिवराजः**–(रामसिंहेन सह प्रविश्य संगीतमाकर्ण्य स्वगतम्) अहो मद्वियोगेन दुरवस्थामनुभवति मम महाराष्ट्रभूमिरिति सूचितमनेन गेयपदेन।

**रामसिंहः**–(शिवराजेन सह सार्वभौममुपसृत्य) विजयतां सार्वभौमः । एष सार्वभौमादेशानुवर्ती समुपस्थितः शिवराजः ।

**शिवराजः**–(त्रिः प्रणम्य) अनुगृह्णातु सार्वभौमः उपहारपरिग्रहेण ।

(इति रत्नान्युपहरति)

**मोगलेशः**–(रामसिहं प्रति) जसवन्तसिंहपार्श्व एनमुपवेशय ।

**रामसिंहः**–यदाज्ञापयति सार्वभौमः ।

(इति यथादिष्टं कुरुते)

**शिवराजः**–(अपवार्य) कुमार कोऽयं जसवन्तसिंहः ।

**रामसिंहः**–(अपवार्य) एष तु जोधपुराधीशः सार्वभौमस्य परमविश्वासभाजनम्।

**शिवराजः**–(अपवार्य सरोषम्) आः किमहं मत्सरिणा मोगलेशेनैवमपमानार्थमत्र निमन्त्रितः । सन्ति जोधपुरेशातिशायिनस्तु ममापरसामन्ताः । अरे कोऽयमधिक्षेपः ।

**रामसिंहः**–(अपवार्य) प्रसीदतु महाराजः ।

**मोगलेशः**–(अपवार्य) अरे किमसौ जल्पति ।

**रामसिंहः**–(अपवार्य) अपरिचितजनसंमर्दः केवलं नर्दत्ययं घर्मपीडितो वनशार्दूलः ।

**मोगलेशः**–तत्प्रापयैनं स्वनिवेशम् ।

**रामसिंहः**–तथा ।

(इति शिवराजेन सह सभामण्डपाद्बहिर्निर्गत्य परिक्रामति)

**शिवराजः**–(साक्षेपम्) कुमार

निमन्त्रितस्यावमतिर्ममेयं

किं सार्वभौमेश्वरतानुरूपा ।

क्षुद्रोऽथवा प्राप्य महत्पदं निजं

निसर्गसिद्धं न जहाति लाघवम् ।।३।।

**रामसिंहः**–महाराज कस्यापि धूर्तस्येदं विचेष्टितमिति तर्कये । एते संप्राप्ता वयमस्मन्मन्दिरम् । यावत्प्रविशामः ।

(ततः प्रविशन्ति मन्दिरावस्थिताः शिवराजं प्रतिपालयन्तो भृत्याः)

**भृत्याः**–(उत्थाय) स्वागतं देवस्य ।

**शिवराजः**–(रामसिंहेन सह प्रविश्य) दुर्दैवतो विफलीभूतोऽस्माकं मनोरथः ।

(इति सर्वैः सहोपविशति)

**रामसिंहः**–महाराज सद्य एव सिद्धिपथमारोक्ष्यति तव मनोरथः ।

**शिवराजः**–(साकूतम्) कुमार दुरवगाह्यो हि दुरात्मनां नयप्रचारः । तद्बहुमानेन प्रतार्य वशीकृता ऋजुधियः क्षत्रेश्वरा अनेन धूर्तेन क्षत्रकुलविनाशायैव प्रयुज्यन्त इति प्रतीयते । सिद्धे कार्ये त्वेतेषां सार्वभौमनिष्ठानां भावि सपर्याफलं शङ्कास्पदमेव ।

**रामसिंहः**–महाराज मिथ्यैवैष ते वितर्कः । अचिरेण प्रकृतिमापन्नः सार्वभौमः सभाजयिष्यति त्वां यथार्होपचारविभवैः । अयमहं सार्वभौममुपेत्य पुनरपि त्वत्समागमार्थं प्रयते ।

(इति निष्क्रान्तः)

**शिवराजः**–अहो बत महत् कष्टम् । यद्

नानाविलासविभवैर्वशतामुपेता

राजन्यबन्धव इमे विकृतात्मभावाः ।

त्यक्त्वा निजं सपदि देशकुलाभिमानं

नष्टाः स्वयं स्वजनमाशु विनाशयन्ति ।।४।।

**रघुनाथपन्तः**–देव यत्सत्यम्

क्व तुच्छभोगापहृतात्ममानाः

स्वधर्ममूढा उदरंभरीश्वराः ।

---

**कस्यापीति ।** अत्र छादनं नाम सन्ध्यङ्गम् ।

**नानेति ।** *** वसन्ततिलकावृत्तम् ।

**क्व तुच्छेति ।** अत्र विषमालङ्कारः ।



क्व राष्ट्रसंस्थापननिश्चितव्रतो

धर्मश्रितो जीवितनिःस्पृहो भवान् ।।५।।

**हिरोजीः**–(परितो विलोक्य ससंभ्रमम्) हा धिक् । महदत्याहितम् ।

**शिवराजः**–(पुरतो विलोक्य) हा बन्दीकृताः स्मो विश्वासघातिना मोगलेशहतकेन । (समन्ताद्विलोक्य) अहो समन्ततोऽवरुद्धमस्मन्मन्दिरं मोगलसैनिकैः। (निःश्वस्य) नूनं यवनदासस्य जयसिंहस्य वचसि वर्तमानेन मया स्वयमेव निमन्त्रितं प्राणसंकटम् ।

अस्मिन्निसर्गकुटिले वितथप्रतिज्ञे

विश्वासमागतवतो नयविच्युतिर्मे ।

मिथ्यावलेपविवशो वरमन्त्रहीनः

सत्त्वोच्छ्रितोऽप्यरिवशं सहसा प्रयाति ।।६।।

**रघुनाथपन्तः**–देव सत्यं विप्रलब्धा वयं जयसिंहेन । यत्–

स्वच्छन्दगामी गिरिगह्वरालयो

रूढप्रतापैरपि दुष्प्रधर्ष्यः ।

वनेश्वरोऽनेन महाप्रलोभनै–

रापादितो व्याधशराग्रलक्ष्यताम् ।।७।।

(प्रविश्यापटीक्षेपेण)

**मोगलनायकः**–राजन् कुटिलराजपुरुषेभ्यस्त्वां रक्षितुं समागमान्तरावधि प्रतिषिद्धस्ते स्वतन्त्रसंचारः सार्वभौमेण ।

**शिवराजः**–अनुग्रह एष सार्वभौमस्य । तस्यैव भूयोदर्शनार्थं मया व्यवसीयते।

**मोगलनायकः**–राजन् साधयामि तवानामयं निवेदयितुं सार्वभौमाय ।

(इति निष्क्रान्तः)

**रघुनाथपन्तः**–नार्हति देव इदानीमात्मानमवसादयितुम् । यतः

---

**यवनदासस्येति ।** अत्र विरोधनं नाम सन्ध्यङ्गम् । तदुक्तं दर्पणे 'कार्यात्ययोपगमनं विरोधनमिति स्मृतम् ।'

**अस्मिन्निति ।** अत्र पश्चात्तापो नाम नाट्यालङ्कारः ।

**स्वच्छन्देति ।** *** अनेन जयसिंहेन । उपजातिवृत्तम् ।

कथं प्रपन्नोऽस्मि नितान्तदुर्गति-
मकाण्ड इत्येष वृथा वितर्कः ।
आसाद्य काष्ठं जलधौ विपन्नः
प्रकल्पयेत्संतरणस्य साधनम् ॥८॥

तच्छीघ्रमेव चिन्त्यतां कोऽपि दुर्गसंतरणोपायः ।

**शिवराजः**–सम्यगवधारितमोगलेशस्वभावेन मया प्रागेवोपकल्पित प्रयाणप्रबन्धः । तच्छृणुत सर्वे सावधानाः । प्रथमं तावदस्मदागमनोत्सवोपायनमिषेण स्कन्धेनोह्यन्तां मिष्टपदार्थपरिपूर्णा बृहत्करण्डाः प्रतिपरिचितक्षत्रकुलमन्दिरम् । समवलोकितेषु च केषुचित्करण्डेषु नष्टाशङ्का भविष्यन्ति मोगलाधिकृताः । अनन्तरं च निलीयैकस्मिन् करण्डे साधयिष्यामि सात्मजस्य मम निर्गमम् । भवद्भिश्च सर्वैर्नानामिषैर्निर्गत्यावां प्रयागमार्गान्तराले प्रतिपालनीयौ । एष हिरोजीरात्मानं रोगाक्रान्तशिवराजं ख्यापयन् सानुचरो भ्रामयिष्यत्यवरोधकगणमाप्रदोषागमम् । ततस्तेनाऽपि सानुचरेण संकेतस्थानमभ्युपगन्तव्यम् । ततश्च नानाछद्मवेषधरा वयं सुखेन प्राप्स्यामोऽस्मत्सह्यप्रदेशम् । इति ।

**रघुनाथपन्तः**–देव सम्यगुपकल्पितोऽयं प्रयाणप्रबन्धः । तदपेक्षितार्थक्रयाय प्रतिष्ठतामापणमस्मद्द्रव्यपालः ।

**द्रव्यपालः**–तथा ।

(इति निष्क्रान्तः)

**रघुनाथपन्तः**–अहं तावत्साधयामि रामसिंहमन्दिरम् ।

(इति निष्क्रान्तः)

(प्रविश्य)

**मोगलनायकः**–राजन् निवेदितं तवानामयं सार्वभौमाय ।

**शिवराजः**–संप्रति तु प्रबलोदरशूलपीडितस्य नास्ति मे स्वास्थ्यलेशः । सुखप्रसुप्तस्य तु कदाचिद्भविष्यति मे वेदनानिग्रहः ।

**मोगलनायकः**–अप्युपस्थापयामि राजवैद्यम् ।

**शिवराजः**–आनिशीथं सुखशयनेन यदि न निरोत्स्यते मे वेदनाप्रकर्षस्तदानीमेव भविष्यति राजवैद्येन प्रयोजनम् ।



**मोगलनायकः**–साधु ।

(इति निष्क्रान्तः)

(प्रविश्य)

**द्रव्यपालः**–देव क्रीता एते मिष्टान्नपूर्णाः पञ्चविंशतिः करण्डाः ।

**शिवराजः**–अये क्रमेणास्मदनुचराधिष्ठितान् मन्दं वाहयैतान् ।

**द्रव्यपालः**–तथा ।

(इति यथोक्तं कुरुते)

**हिरोजीः**–(पुरतो विलोक्य) देव परीक्ष्य पञ्च करण्डान् विरतो मोगलनायकः। तदनयोः करण्डयोर्निलीनौ भवतां देवः कुमारश्च ।

**उभौः**–तथा ।

(इति निलीयेते)

**हिरोजीः**–(क्रमेण करण्डान् वाहयित्वा पुरतो विलोक्य) दिष्ट्या कुमारेण सह निर्विघ्नं निष्क्रान्तो देवः । यावदहं छद्मवेषधरो भूत्वा शयनमारोहामि ।

(इति तथा कुरुते)

(प्रविश्य)

**मोगलनायकः**–अपि लक्ष्यते वेदनापकर्षः ।

**अनुचरः**–आर्य इदानीमेव सुखं प्रवृत्ता बलवदुदरशूलपीडितस्य देवस्य निद्रा। तन्नार्हत्यार्यो वचनमात्रेणापि निद्राभङ्गं विधातुम् । स्वयमेवाहमार्याय निवेदयिष्यामि सुप्तोत्थितस्य तस्य कुशलवृत्तान्तम् ।

**मोगलनायकः**–तथा ।

(इति निष्क्रान्तः)

**हिरोजीः**–एतावता कालेन समुल्लङ्घितः स्यान्नगरसीमान्तो देवेन । तदावामपि तावत्प्रतिष्ठावहे ।

(इतिच्छद्मवेषं परित्यज्य सानुचरो निष्क्रान्तः)

(प्रविश्य)

**मोगलनायकः**–(स्वगतम्) अहो कथमयमेकाकी गाढं स्वपिति । क्व गता अस्यानुचराः । (प्रकाशम्) कः कोऽत्र भोः । (पुनस्तारस्वरेण) कः कोऽत्र भोः ।

(प्रविश्य)

**वृद्धसैनिकः**–आज्ञापयत्वार्यः ।

**मोगलनायकः**–अरे पश्य किमेष विगतचेतन इव लक्ष्यते शयनगतः शिवराजः। न च दृश्यते कोऽप्यस्यानुचरः ।

**सैनिकः**–(शयनमुपसृत्य वस्त्राण्युद्धृत्य ससंभ्रमम्) आर्य क्व शिवराजः । एतानि त्वस्य वसनान्येव ।

**मोगलनायकः**–(ससंभ्रमसाध्वसं तारस्वरेण) हा हताः स्मः ।

(नेपथ्ये)

आर्य मा भैषीः । संनिहिता स्म उद्धृतकृपाणाः ।

(प्रविश्य)

**सैनिकाः**–(खड्गान्युद्यम्य) आर्य दर्शय । क्व सन्ति ते प्राणद्रुहः ।

**मोगलनायकः**–(सरोषम्) रे जाल्माः, भवन्त एव मे प्राणद्रुहः । क्वास्ति शिवराजः।

**सैनिकाः**–आर्य भवेदत्रकुत्रापि प्रच्छन्नः ।

(इति समन्तादन्विष्यन्ति)

**मोगलनायकः**–(ससंभ्रमम्) अरे निपुणमवेक्षध्वम् ।

**सैनिकाः**–आर्य न लभ्यतेऽसौ कितवः ।

**प्रथमः**–असौ दानवस्तु स्वमायया तिरोहितो भवेत् ।

**द्वितीयः**–अरे कदाचिद्वियन्मार्गेणोद्गतः स्यात् ।

**तृतीयः**–मूढ भूगर्भमार्गेणैव संभवत्यस्य पलायनम् ।

**मोगलनायकः**–(सरोषम्) अरे अनभिजाताः । नायं वितर्कासरः । कुतोऽपि निगृह्यानयन्तु तं सार्वभौमबन्दिनं मत्समक्षम् ।

(सर्वे पुनरपि मृगयन्ते)



**वृद्धसैनिकः**–(नायकमुपसृत्य) आर्य वृथाऽयं कोलाहलः । स धूर्तः कथमपि प्रच्छन्नं पलायित इति तु सिद्धम् । तदविलम्बेनैव सार्वभौमं गृहीतार्थं कुर्मः ।

**मोगलनायकः**–तथा ।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **प्रयाणप्रबन्ध**नामाऽष्टमोऽङ्कः ।।

---

**इति श्रीछत्रपतिसाम्राज्यटीकायां सर्वाङ्गविद्योतन्यां**
**प्रयाणबन्धनामाऽष्टमोऽङ्कः समाप्तः ।**

# नवमोऽङ्कः ।

(ततः प्रविशत्यन्तर्गृहावस्थिता राजमाता)

**राजमाता**–(स्वगतम्) श्रुतं मया चारेभ्यो यत्प्रतार्य मोगलाधिकृतान् देशाद्देशान्तरं पर्यटन् संप्राप्तो वत्सः करवीरक्षेत्रम् । तदचिरेणात्र भविष्यति तस्य सुखागमनम् । अत आज्ञप्तो मया प्रधानमन्त्री सह्यदुर्गलङ्घनाय । येनोपस्थिते वत्से शीघ्रं संपादितो भवेत्साम्राज्याभिषेकमहोत्सवः ।

(प्रविश्य)

**कञ्चुकी**–एष राजकार्यव्याकुलः प्रधानमन्त्री द्वारि तिष्ठति ।

**राजमाता**–प्रवेशयैनम् ।

**कञ्चुकी**–तथा ।

(इति निष्क्रान्तः)

(प्रविश्य)

**प्रधानमन्त्री**–अम्ब त्वदादेशानुरोधेन मयात्मसात्कृताः पञ्चषाः सह्यदुर्गाः ।

**राजमाता**–मन्त्रिवर्य, अभिनन्दाभि तव युद्धपाटवम् । अथोपलब्धा काप्यभिनवा प्रवृत्तिर्वत्सस्य ।

**प्रधानमन्त्री**–अद्यावधि तु नास्ति श्रुतिगोचरा कापि देवस्याभिनवा प्रवृत्तिः। संप्रति सभागृहमुपेत्य जानामि देशान्तरप्रतिपत्तिम् ।

(इति निष्क्रान्तः)

(प्रविश्य)

**कञ्चुकी**–एतेऽत्रभवतीं द्रष्टुकामा यतयो द्वारि तिष्ठन्ति ।

**राजमाता**–प्रवेशयैतान् ।

**कञ्चुकी**–तथा ।

(इति निष्क्रान्तः)

---

**मयात्मसात्कृता इति ।** अत्र निर्वहणसंध्यारम्भः । तदुक्तं दर्पणे 'बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् । एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत् ।।' इति ।



(प्रविश्य)

**यतयः**–वर्धतां प्रार्थितफलाधिगमेन राजमाता ।

**राजमाता**–(सप्रश्रयम्) प्रतिगृहीताशीः । दिष्ट्याद्य पवित्रीकृतोऽयमुद्देशो भगवतां सान्निध्येन । (वामाक्षिस्पन्दनं सूचयित्वा स्वगतम्) अपि नाम लभेय मम वत्सस्य प्रवृत्तिम् ।

**प्रधानयतिः**–अम्ब तीर्थयात्राप्रसङ्गेनानीतं मयाऽभिषेकार्थमेतद्गङ्गोदकम् ।

**राजमाता**–(प्रधानयतिं निर्वर्ण्य सविस्मयं स्वगतम्) अहो केनचिदंशेन संवदत्यस्य मुखच्छविर्मम वत्सस्य मुखच्छविना ।

**प्रधानयतिः**–तद्गृहाणैतद् ।

(इत्युपसृत्य कलशमर्पयति)

**राजमाता**–महानेषोऽनुग्रहः । (इति गृह्णाति) अपि ज्ञायते कापि मम वत्सस्य प्रवृत्तिः ।

**प्रधानयतिः**–अम्ब नातिदूरं वर्तते तवात्मजः । (इति यतिवेषमपनीय) एष सुखप्रत्यागतः शिवराजोऽभिवादयते ।

(इति पादयोः पतति)

**राजमाताः**–(सविस्मयम्) अहो वत्सः शिवराजः । न खलु मयाऽभिज्ञातोऽसि। (सानन्दाश्रु हस्तयोर्गृहीत्वा) वत्स उत्तिष्ठ । दिष्ट्याद्योज्जीवितास्मि ।

मुक्तस्य दुष्टयवनाधिपपाशबन्धात्
प्रत्यागतस्य पुरतो मम संस्थितस्य ।
एतत्तवाननमुपोढनवप्रसादं
मां तर्पयत्यतितरां तरुणेन्दुकान्तम् ।।१।।

वत्स पूर्वमेव मयादिष्टेन मन्त्रिणा स्वायत्तीकृताश्चाकणप्रभृतयः सह्यदुर्गाः । तद्दण्डनीतिमेव समाश्रित्य विजित्य च महाराष्ट्रप्रदेशं संपादय तव साम्राज्याभिषेकमङ्गलम्।

---

**सविस्मयमिति ।** अत्र यतिवेशधरः शिवराज आलम्बनं विस्मयश्च स्थायिभावः । एवमत्राद्भुतो रसः। तदुक्तं दर्पणे – 'कुर्यान्निर्वहणेऽद्भुतम्' इति ।

**शिवराजः**–अम्ब त्वदादेशानुरोधेनाविलम्बेनैव निर्वर्तयिष्येऽभिषेकमङ्गलम्। अतः परं च स्वातन्त्र्येणैव प्रवर्तिष्यते मम राज्यतन्त्रम् । कः कोऽत्र भोः ।

(प्रविश्य)

**कञ्चुकी**–आज्ञापयतु देवः ।

**शिवराजः**–मन्त्रगृहमार्गमादेशय ।

**कञ्चुकी**–इत इतो देवः ।

(उभौ परिक्रामतः)

एतन्मन्त्रगृहद्वारं प्रविशतु देवः ।

(इति निष्क्रान्तः)

(ततः प्रविशन्ति मन्त्रगृहावस्थिता मन्त्रिणः)

**मन्त्रिणः**–(उत्थाय) स्वागतं देवस्य ।

**शिवराजः**–भवान्यनुग्रहेण खलु रक्षितोऽस्मि ।

**मन्त्रिणः**–देव, अद्य खल्वस्माकं महाराष्ट्रस्य च सुप्रभातम् ।

(नेपथ्ये)

**वैतालिकः**–विजयतां देवः ।

कुटिलयवनपाशान्नीतियोगापसृप्तो
द्युमणिरिव समन्ताद्राहुणा ग्रस्तमुक्तः ।
चिरविरहविपन्नान् रञ्जयन् सह्यदुर्गा-
नुपचितनवतेजा राजसे राजसूर्य ।।२।।

(अष्टोत्तरशतशतघ्नीस्वनोपक्रमः)

**शिवराजः**–मन्त्रिणः परमं प्रीणयति मां भवतां सह्यजनानां च राजनिष्ठा ।

(प्रविश्य)

**प्रतीहारः**–विजयतां देवः । कोऽपि वैदेशिको द्वारि संप्राप्तः ।

**शिवराजः**–प्रवेशयैनम् ।

**प्रतीहारः**–तथा ।

(इति निष्क्रान्तः)

**कुटिलेति ।** *** मालिनीवृत्तम् ।



(प्रविश्य)

**वैदेशिकः**–विजयतां देवः । कृतघ्नेन मोगलेशेन त्वमसि शिवराजस्य पक्षपातीति निर्भर्त्स्य स्वाधिकारात्प्रभ्रंशितो महाप्रतापो जयसिंहः । ततश्च मोगलराजधानीं विनिवृत्तोऽसौ दुर्मनायमानो मार्ग एव–'आसादितं मया कृतघ्नसपर्याया मर्मविदारणं फलम् । यद्

आजन्मनः परिचरन् यमनन्यभक्तिः
स्वज्ञातिजानपि भटाननयं विनाशम् ।
सोऽयं वलीपलितविक्लवदेहयष्टेः
संतर्जनेन मम हा हृदयं भिनत्ति ।।३।।

हा विश्वनाथ देहि मे शरणम् ।' – इत्याक्रुश्य प्राणानजहात् । तदनन्तरं च सार्वभौमाज्ञया तत्पदमारूढो मोगलयुवराजसहायो जसवन्तसिंहः ।

**शिवराजः**–(निःश्वस्य) विक्रमशालिनामपि नयमार्गविच्युतानामपरिहार्य एवेदृशो दुर्विपाकः ।

**प्रधानमन्त्रीः**–देव नूनं शोचनीयामवस्थामापादितोऽयं प्रवीरो मोगलेशहतकेन।

**शिवराजः**–संप्रति खलु गान्धाराणां नियमने व्यापृतोऽस्ति मोगलेशः । तदस्माभिर्महार्हरत्नोपायनैः समाराध्य दक्षिणापथाधिपं सद्य एवात्मसात्कर्तव्या महाराष्ट्रभूः।

**प्रधानमन्त्री**–देवस्योपस्थितेः पूर्वमेव मया स्वायत्तीकृताश्चाकणप्रभृतयः सह्यदुर्गाः । अवशिष्टानां दुर्गाणां कल्याणप्रान्तस्य चाक्रमणाय प्रस्थापिता मया सेनानिवहाः। परंतूदयभाणपालितः सिंहगडदुर्गः कथमाक्रमणीय इत्यतीवोत्कण्ठितोऽस्मि।

**शिवराजः**–(विचिन्त्य) न कोऽप्यमात्यमन्तरेणैतत् कार्यं साधयितुं क्षमोऽस्ति। संप्रति तु स्वात्मजस्योद्वाहकर्मणि व्यग्रोऽसौ नार्हति प्रयाणानुशासनम् ।

(ततः प्रविशत्यपटीक्षेपेण तानाजीः)

**शिवराजः**–(सविस्मयम्) अहो अमात्यः । अपि संपन्नं मङ्गलकार्यम् ।

**तानाजीः**–देवस्यानुग्रहेणैतत्सुसंपन्नमेव । यतः स्वयमेवाम्बा निर्वाहयिष्यति विवाहोत्सवम् । तया चादिष्टोऽहमद्यैव प्रतिष्ठे सिंहगडदुर्गविजयाय । तदत्र भवतु

वीतौत्सुक्यो देवः ।

**शिवराजः**–अहो धन्योऽसि मम प्रधानवीर । अद्य खलु

तृणाय मत्वात्मजकौतुकक्रियां
राष्ट्रैकभक्त्योद्वहता धुरं रणे ।
एकान्ततो मातृनिदेशवर्तिना
संपादितं दाशरथेर्यशस्त्वया ॥४॥

इदानीं तु हस्तगत एव मम सिंहगडदुर्गः । यतः

एको महेशस्त्रिपुरस्य भेत्ता
हरिर्यथा दैत्यकुलस्य हन्ता ।
तथा त्वमेवासि ममाग्रवीर
न चेतरो दुर्गवरस्य जेता ॥१॥

**तानाजीः**–देव प्रभूणामेव प्रभावेण सर्वत्र नियोज्यानां साध्यसिद्धिः । तद्-

आक्रम्य दुर्भेद्यमरातिसैन्यं
सद्यो विजेष्ये सहसाग्रदुर्गम् ।
सेनाधिपत्ये हरिणा नियुक्तो
न किं कुमारो हतवान् सुरारीन् ॥६॥

**शिवराजः**–तत्प्रतिष्ठतां मे प्रधानवीरो दुर्गविजयाय ।

**तानाजीः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

(प्रविश्य)

**द्वारपालः**–विजयतां देवः । मोगलेशमुद्राङ्कितपत्रहस्तो दूतो द्वारि तिष्ठति।

**शिवराजः**–प्रवेशयैनम् ।

**द्वारपालः**–तथा ।

(इति निष्क्रान्तः)

---

**एको महेश इति ।** अत्र सिद्धिर्नाम लक्षणम् ।



(प्रविश्य)

**दूतः**–विजयतां महाराजः । दक्षिणापथाधिपेन प्रणयाभिनन्दनपुरःसरं प्रेषितमेतत्सार्वभौमशासनपत्रम् ।

(इति पत्रमर्पयति)

**शिवराजः**–(आदाय) मन्त्रिन् उद्धाट्य वाचयैतत् ।

(इत्यर्पयति)

**मन्त्री**–तथा ।

(इति वाचयति)

निजराजनगरात् केनाऽपि साम्राज्यविद्वेषिणोपजापकेनापसारितस्यापि साम्राज्यसपर्यानुरक्तस्यानेकसाहसविक्रमशालिनो महम्मदीयधर्मरक्षकस्य शिवराजस्य सर्वानपराधान् मर्षयित्वा तं च राजपदेन संयोज्य तस्मै संनिहितराज्ययोश्चतुर्थांशसंग्रहाधिकारं वितरति सार्वभौमः । इति ।

**शिवराजः**–मन्त्रिन्, अपूर्वः खल्वयमनुग्रहः सार्वभौमस्य दक्षिणापथाधिपस्य च । दूत त्वं तावन्निवेदय दक्षिणापथाधिपाय यदचिरेण प्रतापरावद्वितीयो मम वीरात्मज उपैष्यति तवान्तिकमिति ।

**दूतः**–तथा ।

(इति निष्क्रान्तः)

**शिवराजः**–मन्त्रिन् नायं बहुमानः किंतु प्राणसंशयान्ता प्रतारणा । यतः

कृतापकारेषु परेषु दुर्मति–
स्त्वकाण्डमाविष्कुरुते य आदरम् ।
संमानदाम्ना स निबध्य तान् पशून्
वधस्थलीं शौनिकवन्निनीषति ॥७॥

**मन्त्री**–देव, इदानीमन्यतो व्यापृतेनानेन युद्धविरामार्थं पुरस्कृतोऽयं सामोपचारः। परंत्वेतेन तव करतलोपस्थापितेव साम्राज्यसिद्धिः । यतः

दिल्लीश्वरानुमतराजपदं पुनस्ते
स्वातन्त्र्यमेव परितः प्रकटीकरोति ।

सोऽयं तवांशहरणे प्रथितोऽधिकार-

स्त्वां मण्डलेशपदमर्पयति प्रशस्तम् ।।८।।

**शिवराजः**–अहो सम्यग्गृहीतं त्वया सार्वभौमशासनतत्त्वम् । तथापि नायमवसरोऽस्माभिरुपेक्षणीयः । तद् द्वैधमाश्रित्य सद्य एव साधनीयमस्मदभीष्टम् ।

**मन्त्री**–सर्वथाऽभिनन्द्यते देवस्याध्यवसायः ।

**शिवराजः**–तत्प्रतिष्ठतां कुमारेण सह प्रतापरावो दक्षिणापथाधिपराजधानीम्। तत्र च निवसताऽनेन कर्तव्यः समन्ततोऽस्मच्चतुर्थांशसंग्रहः ।

**प्रतापरावः**–यदाज्ञापयति देवः ।

(इति निष्क्रान्तः)

**शिवराजः**–मन्त्रिन् गान्धारविजयानन्तरमेवाभियोक्ष्यतेऽस्मान् धूर्तो मोगलेश्वरः। तत् क्षिप्रमेव संनाहितबलैरस्माभिश्चतुर्थांशसंग्रहमिषेणाक्रम्य स्वायत्तीकर्तव्यः समग्रो महाराष्ट्रप्रदेशः । भवन्त्वद्यैव प्रयाणाभिमुखास्त्वदधिष्ठिता मे रणप्रवीराः । यावदहमपि करोपसंग्रहार्थं प्रतिष्ठे गुर्जरप्रदेशम् । प्रत्यागतेष्वस्मासु प्रवर्तिष्यते साम्राज्याभिषेकमहोत्सवः । तत्संभ्रियन्तां संभाराः पुरोहितपुरोगमैः कर्मसचिवैः।

**मन्त्री**–यथाज्ञापयति देवः ।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **दुर्गविजय**नामा नवमोऽङ्कः ।।

---

**तत्संभ्रियन्तामिति ।** अत्र प्ररोचनाख्यं संध्यङ्गम् ।

**इति श्रीछत्रपतिसाम्राज्यटीकायां सर्वाङ्गविद्योतन्यां**

**दुर्गविजयनामा नवमोऽङ्कः समाप्तः ।**

## दशमोऽङ्कः ।

(ततः प्रविशतो राजपुरुषौ)

**प्रथमः**–अहो बतासत्यसन्धस्य मोगलेशस्य कुटिलपाशबन्धविनिर्मुक्तेन महाराजेन पुनरपि लीलायुद्धैः स्वायत्तीकृता महाराष्ट्रभूः ।

**द्वितीयः**–भद्र तथापि सिंहगडदुर्गजयेन नासीद्देवस्य परमः परितोषः ।

**प्रथमः**–अये कथं विजयेऽप्यपरितोष इत्युच्यते ।

**द्वितीयः**–तद्दुर्गजयाय प्रेषितस्य तानाजीवीरस्य प्राणान्तसंकटेनोद्वेजितो देवः।

**प्रथमः**–कुतो विजेतुरपि प्राणसंकटम् ।

**द्वितीयः**–भद्र, गाढान्धकारावृते निशीथे गोधामवलम्ब्य तद्दुर्गप्राकारमासाद्यैकेन मावळेवीरेणाधः प्रसारिताभी रज्जुभिरयं प्रवीरोऽध्यारोहयन्निजं सैनिकगणम् । अथ प्रवृत्ते घोरसंग्रामे परस्परं नियुध्यमानावुदयभाणतानाजीवीरौ वीरगतिं समापद्येताम् ।

**प्रथमः**–अहो स्वाम्यर्थं प्राणानुत्सृजताऽनेन खलु कृतकृत्यतां नीतं क्षात्रं जन्म ।

**द्वितीयः**–अत्रान्तरे च तेनैव मार्गेणाध्यारूढेन सूर्याजीवीरेण परास्य रिपुदलं स्वविजयख्यापनाय प्रज्वालितो महानलः । तत्क्षणं तेन संजातहर्षेणापि देवेन यदा परेद्युर्निजबालसुहृदस्तानाजीवीरस्य प्राणव्ययोदन्त आकर्णितस्तदानीमेव विषण्णवदनेन सहसोदीरितं 'हा कष्टमेकः सिंहः प्रतिपन्नः । अपरस्तु विपन्नः ।' इति ।

**प्रथमः**–अहो, अनेकवीरव्ययसाध्या हि साम्राज्यसिद्धिः ।

**द्वितीयः**–अथ किम् । ततः प्रभृति तु सर्वत्राप्रतिहतप्रसरोऽभूद्विजयध्वजो देवस्य । आबाजीवीरेण स्वायत्तीकृतः कल्याणप्रदेशः । प्रधानमन्त्रिणा च माहुलीदुर्गः। प्रतापरावेण च साल्हेरदुर्गः । एवं समन्ततो विजयरमाश्रितस्य देवस्य साम्राज्यमहोत्सवमभिनन्दितुं संप्रति समुपस्थितेन सामन्तमण्डलेन समाकुलोऽयं दुर्गराजः परमां श्रियमादधाति ।

**प्रथमः**–देवतानुग्रहमन्तरेण नैव संभवत्येतादृशं सौभाग्यम् ।

**द्वितीयः**–अपिच संप्राप्ता अत्र साक्षाद्वेदमूर्तयः काशीनिवासिनो गागाभटप्रभृतयो विप्रवर्या देवस्य साम्राज्याभिषेकं संपादयितुम् ।

**प्रथमः**–एवं समुपार्जिता महाराजेन सकलभारतव्यापिनी यशःसमृद्धिः ।

**द्वितीयः**–भद्र जातः खलु सभाप्रवेशसमयः । यावत्तत्रोपेवः ।

(इति परिक्रामतः)

**प्रथमः**–(परितो विलोक्य) नूनमदृष्टपूर्वामेव सुषमां बिभर्ति दुर्गराजः ।

ध्वजवसनपताकामण्डिता राजमार्गाः
कुसुममुकुलमालारञ्जिताः कुट्टिमाश्च ।
नवविरचितरागालेख्यचित्रास्तराणि
दधति परमशोभां धूपितान्यङ्गनानि ।।१।।

**द्वितीयः**–एवमेतद् । एते संप्राप्ता वयमभिषेकमण्डपपरिसरम् । पश्यात्र

मुक्ताहिरण्मयपटारचितोपकार्या
वासोगृहाणि विपुला गजवाजिशालाः ।
कोशालयाश्च वसनाभरणान्नकोष्ठाः
प्रख्यापयन्त्यनुपमामधिराजलक्ष्मीम् ।।२।।

**प्रथमः**–अप्रतिमः खल्वयं साम्राज्याभिषेकमहोत्सवोपक्रमः । यतः

मुक्ताविद्रुमतोरणाङ्कितपुरोद्वाराणि तूर्यस्वनै–
श्चीत्कारैः करिणां मृदङ्गनिनदैरातन्वते मङ्गलम् ।
काञ्चीनूपुरकिङ्किणीक्वणितकै रम्यैर्यशोगीतिकां
गायन्ति प्रमदा महोत्सवमुदा मोदाश्रुपूर्णाननाः ।।३।।

**द्वितीयः**–न खल्वयं केवलं महोत्सवः किंतु महाराष्ट्रियाणां स्वातन्त्र्यसूर्योदयोऽपि। (सभामण्डपं प्रविश्य) भद्र पश्यैष निर्वर्तितसाम्राज्याभिषेक-मङ्गलो देवो मातरमभिवादयते ।

---

**ध्वजेति ।** *** मालिनीवृत्तम् ।

**मुक्ताविद्रुमेति ।** *** शार्दूलविक्रीडितं वृत्तम् ।



चण्डांशुप्रखरातपारुणरुचिर्दूरात्परांस्तापय–
न्नासीद्यस्तपनद्युतिः परिपतन् देशान्तरं देशतः ।
ज्योत्स्नासंमतमानदानपरमः पीयूषरत्नाकरः
सोऽयं चाद्रमसीं दधाति सुषमामाह्लादयन् स्वाः प्रजाः ।।४।।

तत्तावद्वयमप्यासनपरिग्रहं कुर्मः ।

(इति निष्क्रान्तौ)

**विष्कम्भकः ।**

(ततः प्रविशति यथानिर्दिष्टः शिवराजः)

**शिवराजः**– अम्ब एष संपादितसाम्राज्याभिषेकमङ्गलो महिषीद्वितीयः शिवराजोऽभिवादयते ।

(इति महिष्या सह पादयोः पतति)

**राजमाता**–(सानन्दाश्रु) वत्स चिरं जीव । वत्से चिरं सकलसौभाग्यभाजनं भूयाः । दिष्ट्याद्य खलु मया प्रत्यक्षीक्रियते पूर्वानुभूतं स्वप्नदर्शनम् । यतः

संस्थाप्य विक्रमजितं भुवि धर्मराज्यं
वत्स त्वया कुलयशः प्रथितं त्रिलोक्याम् ।
यच्चापि दुर्लभमनन्ततपश्चयेन
तद्वै प्रवीरजननीपदमर्पितं मे ।।५।।

**उभौ**–(सप्रश्रयम्) प्रतिगृहीताशीः ।

**शिवराजः**–अम्ब प्रतिपदं त्वदनुशासनानुवर्तिनैव मया समासादितोऽयं लोकोत्तरोत्कर्षः ।

(इति छत्रचामरधरैरुपसेवितो रत्नसिंहासनमुपसृत्य महिष्या सहारोहति)

**सभ्याः**–(उत्थाय) विजयतां छत्रपतिमहाराजः । विजयतां सम्राज्ञी ।

(इति सुवर्णकुसुमानि विकिरन्ति)

(प्रधानाधिकारिणः सामन्तप्रतिनिधयश्च मणिमुक्तास्वर्णकुसुमस्रजः अर्पयन्ति)

(नेपथ्ये)

**वैतालिकौ**–विजयतां महिषीद्वितीयश्छत्रपतिमहाराजः साम्राज्याभिषेकमङ्गलेन।

---

**चण्डेति ।** ***शार्दूलविक्रीडितं वृत्तम् ।

द्विजवरसचिवेन्द्रैर्मन्त्रतोयाभिषिक्तो
विजयपदवितानैर्दिव्यकन्याऽभिगीतः ।
रुचिरमणिकिरीटी रत्नसिंहासनस्थः
विबुधपतिरिव त्वं राजसे भारतेन्द्र ॥६॥

(अष्टोत्तरशतशतघ्नीस्वनोप्रक्रमः)

**वीणिनौ**–(वीणावाद्येन गायतः)

**(मालकोशरागेण त्रितालेन गीयते)**

कृपालो छत्रपते महाराज ॥
भारतवर्षनरेशकुलपते
नयसमुपार्जितदिगन्तकीर्ते
रमापते महाराज । कृपालो० ॥१॥
स्वातन्त्र्यसुरापगावतारण-
सुखसंपादितराष्ट्रोद्धारण
धर्मपते महाराज । कृपालो० ॥२॥
मायापहृतनिखिलभूभार-
स्त्वमसि कृपानिधिशिवावतारः
विबुधपते महाराज। कृपालो० ॥३॥
अरिगणचक्रतिमिरहरमिहिर-
स्त्वं विलससि महसा रणवीर-
स्त्विषां पते महाराज । कृपालो० ॥४॥
निजजनपदपुरजनाभिनन्दित
देवद्विजवरकिन्नरवन्दित
विश्वपते महाराज । कृपालो० ॥५॥

---

**द्विजवरेति ।** द्विजवराः पुरोहितप्रमुखाः विप्राः सचिवेन्द्राः अमात्यप्रमुखाः क्षत्रियाः तैः मन्त्रतोयैःअभिमन्त्रितजलैः अभिषिक्तः विजयस्य पदानां गेयपदानां वितानैः स्वरविस्तारैः दिव्यकन्याभिः अभिगीतः रुचिरः मणिकिरीटः अस्यास्तीति धृतरुचिरमणिकिरीटः इत्यर्थः रत्नसिंहासनस्थः त्वं विबुधपतिः इव इन्द्र इव हे भारतेन्द्र राजसे । मालिनीवृत्तम् ।

**कृपालो इति ।** *** हे विश्वपते । अत्रान्त्यानुप्रासः शब्दालङ्कारः ।



**गागाभटः**–दिष्ट्याऽद्य वर्धते महाराजश्चिरप्रार्थितेन साम्राज्यश्रीविलसितेन।

बाहुप्रतापसमुपात्तदिगन्तकीर्तिः
सामन्तमौलिमणिरञ्जितपादपीठः ।
राजन्यमन्त्रिसचिवैः समुपासितस्त्वं
साम्राज्यवैभवयुतोऽतितरां विभासि ॥७॥

**शिवराजः**–भगवन् परदेवताप्रसादेन श्रीगुरुरामदासचरणानुग्रहेण चाद्य समासादितं मया साम्राज्यैश्वर्यम् । तत्–

चिरं कषायध्वजमण्डितानि
राष्ट्रे सभामण्डपमन्दिराणि ।
साम्राज्यदेवस्य गुरोः समन्तात्
प्रख्यापयन्त्वप्रतिमं प्रभावम् ॥८॥

**प्रधानमंत्री**–(प्रतिनिधिमण्डलं निर्दिश्य) एते कुत्बशाहीशप्रभृतिसामन्तप्रतिनिधयो हस्त्यश्वरत्नहिरण्योपायनैर्देवस्य साम्राज्याभिषेकमहोत्सवमभिनन्दन्ति ।

**शिवराजः**–मन्त्रिन् सामन्तसाहाय्येनाद्य मयाऽनुभूयत एतन्मङ्गलम् । तत्सत्कृत्य तोषयैतान् महार्हवस्त्राभूषणादिभिः ।

**प्रधानमन्त्री**–तथा ।

(इति यथादिष्टं कुरुते)

**शिवराजः**–अथ च संभावयतु कोशाध्यक्षो लक्षमुद्राभिराचार्यं चतुर्विंशतिसहस्रमुद्राभिः पुरोहितं प्रत्येकं पञ्चसहस्रमुद्राभिश्चर्त्विजं महार्हवस्त्राभूषणैश्च सर्वान् द्विजोत्तमान् ।

**कोशाध्यक्षः**– तथा ।

(इति यथादिष्टं कुरुते)

**गागाभटः**–भारतेन्द्र तव महार्हसंभावनया परितुष्टानामस्माकमेतदेवास्ति परममाशास्यम् । यत्तवायं

---

**परदेवतेति ।** अत्रानन्दाख्यं संध्यङ्गम् ।

**अथ च संभावयत्विति ।** अत्र भाषणाख्यं संध्यङ्गम् ।

स्वातन्त्र्यभावज्वलिताहवाग्नौ
द्विषद्धविर्भिर्जनताप्रतर्पणैः ।
निर्वाहितो मन्त्रिपुरोहितादिभिः
साम्राज्ययज्ञो नितरां समृद्ध्यताम् ।।९।।

**शिवराजः**–अथ सभाजय मम साम्राज्याधिकारपदमण्डनानष्टौ प्रधानमन्त्रिणो महार्हरत्नवसनाभूषणैः ।

**कोशाध्यक्षः**–तथा ।

(इति यथादिष्टं कुरुते)

**प्रधानमन्त्री**–दिष्ट्येदानीं सम्राट्पदमधिरूढं महाराजमभिनन्द्याशास्त एष भृत्यवर्गो यत्

प्रबलकुटिलविद्विषां विभेत्ता
प्रतिदिनमेष तवैधतां प्रभावः ।
तपनकुलमणेः सपर्ययेदं
भवतु सदा सफलं च जीवितं नः ।।१०।।

**शिवराजः**–अथ बहुमानेन संमानयस्व मे विजययशोभागिनो वीराग्रसरान्।

हुत्वा देहं निजं ये समरहुतवहे प्रस्थिताः पुण्यलोकां-
स्तेषां वीरोत्तमानां समुदितयशसामन्वये ये प्रसूताः ।
मत्युत्कर्षप्रतापप्रमथितरिपवो ये पुनर्नीतिदक्षाः
सर्वे ते राष्ट्रभक्ता नृपकुलविभवैर्माननीया यथार्हम् ।।११।।

**कोशाध्यक्षः**–तथा ।

(इति राजशासनान्यर्पयति)

**शिवराजः**–मन्त्रिन् संभावय विदुषो विप्रवर्यान् नियतवार्षिकवृत्तिवितरणेन। मा सीदत्वस्मिन् मम धर्मराज्ये कोऽपि स्नातको द्विजोत्तमः । यतस्तदधीन एव सद्विद्याप्रचारः ।

---

**स्वातन्त्र्येति ।** *** उपजातिवृत्तम् ।
**हुत्वेति ।** *** स्रग्धरावृत्तम् ।



**मन्त्री**–तथा ।

(इति विप्रेभ्यो राजशासनान्यर्पयति)

**शिवराजः**–सचिवाः, येषां नानाधर्माणां लोकानां संग्रहार्थमनेकवीरबलिभिर्मया समुपार्जितमेतद्धर्मराज्यं तान् सर्वानपि वसनान्नपानादिभिः सत्कृत्यानुरञ्जयत । यतस्तदनुरागपरवशा ह्यस्माकं साम्राज्यसंपदः ।

**सचिवाः**–तथा ।

(इति निष्क्रान्ताः)

(प्रविश्य)

**प्रतिहारः**–विजयतां देवः । दिष्ट्या संप्राप्ता अत्र श्रीचरणाः ।

**शिवराजः**–शीघ्रं प्रवेशय भगवन्तं महानुभावम् ।

**प्रतिहारः**–तथा ।

(इति निष्क्रान्तः)

(ततः प्रविशति श्रीरामदासः)

**शिवराजः**–(सर्वैः सहोत्थाय) एष श्रीचरणप्रसादसमुपार्जितसाम्राज्यवैभवः शिवराजोऽभिवादयते ।

(इति पादयोः पतति)

**श्रीरामदासः**–वत्स, उत्तिष्ठ । मम वचसि सर्वथा वर्तमानस्य तव सकलमप्यभीष्टं मया तपःप्रभावात्संपादितम् । अथ किं ते भूय उपकरवाणि ।

**शिवराजः**–भगवदनुग्रहेण न मे किमपि भद्रमवशिष्यते । तथापीदमस्तु भरतवाक्यम् । यदस्मिन् मम भारतवर्षे

---

**अथ किं ते भूय इति ।** अत्र काव्यसंहाराख्यं संध्यङ्गम् ।
**तथापीदमस्त्विति ।** अत्र प्रशस्त्याख्यं संध्यङ्गम् ।

मोदन्तां नितरां स्वकर्मनिरताः पर्याप्तकामाः प्रजा
एधन्तां नयविक्रमाङ्कयशसो लोकप्रियाः पार्थिवाः ।
सस्यानां च समृद्धये जलमुचः सिञ्चन्तु काले रसां
सप्ताङ्गप्रकृतिप्रकर्षरुचिरं राष्ट्रं चिरं वर्धताम् ।।१२।।

(इति निष्क्रान्ताः सर्वे)

।। समाप्तोऽयं **साम्राज्याभिषेक**नामा दशमोऽङ्कः ।।

**।। समाप्तमिदं छत्रपतिसाम्राज्यं नाम नाटकम् ।।**

---

**मोदन्तामिति ।** *** सप्त अङ्गानि स्वाम्यमात्यादीनि यस्याः तस्याः प्रकृतेः प्रकर्षेण रुचिरं दीप्तं राष्ट्रं चिरं वर्धताम् । शार्दूलविक्रीडितं वृत्तम् ।

सर्वेषां नाटकाङ्गानां दिङ्मात्रमिह दर्शितम् ।
विशेषः शास्त्रतस्तूह्यः काव्यपीयूषलालसैः ।

**इति श्रीछत्रपतिसाम्राज्यटीकायां सर्वाङ्गविद्योतन्यां**
**साम्राज्याभिषेकनामा दशमोऽङ्कः समाप्तः ।**

## पद्यसूची


अनन्यभावः परदेवतायां – २.७
अनायासेन कार्यस्य – १.२८
अन्तरायनिकषैः परीक्षिता – २.६
अन्योन्येर्ष्याकलुषितधियः – १.२५
अपास्य दूरं मलिनां तमस्विनीं – २.२
अविदिततपनान्वयप्रतापः – ४.८
अवेहि नैनं पुरतः प्रसारितं – २.९
अस्मिन्निसर्गकुटिले वितथप्रतिज्ञे – ८.६
आकृष्टभीषणकृपाणकरालपाणि – ५.८
आक्रम्य दुर्भेद्यमरातिसैन्यं –९.६
आच्छाद्येवोष्णरश्मिं निजघनततिभि – ७.४
आजन्मनः परिचरन् यमनन्यभक्तिः – ९.३
आजन्मनो जनमिमं द्विषताऽधमेन – ७.६
आर्तानां परिपालनाय सहसा – १.१५
आसीन्नभो यद्विशदं समन्ता – ५.२
उच्चावचाचलभुवो गिरिगह्वराणि – ७.२
उत्तुङ्गं सुरनिम्नगा – १.१
उद्धर्तुमेनां परिपीडितां भुवं – १.८
उद्भास्य शैलशिखरोच्छ्रितपादपाग्रं – ३.२
एकाकिनं समरवीरमिमं समैते – ५.७
एकान्तेनैवाप्रधर्ष्यं बलाढ्यं – ६.८
एको महेशस्त्रिपुरस्य नेता – ९.५
एतद्विरूढतरुगुल्मलतावितान – ४.२०
कथं प्रपन्नोऽस्मि नितान्तदुर्गति – ८.८
कामक्रोधातिरेकव्यसनविदलितं – ४.९
कुटिलयवनपाशान्नीतियोगापसृप्तो – ९.२
कृतापकारेषु परेषु दुर्मति – ९.७
क्व तुच्छभोगापहृतात्ममानाः – ८.५
क्षेत्रेऽपि सीरोत्कषणावकल्पिते – ४.१७
चण्डांशुप्रखरातपारुणरुचि – १०.४
चिरं कषायध्वजमण्डितानि – १०.८
जनपदहितदक्षो नीतियोगप्रतिष्ठो – ३.३
तपनकुलभवस्य धर्मवृत्ते – ३.६
तपनांशुतपनशमनो – १.२
तव व्रते मे हृदयं प्रतिष्ठितं – ३.१७
तृणाय मत्वात्मजकौतुकक्रियां – ९.४
तृणाय मत्वा निजजीवितं कृतं – ५.६
त्वदन्नपानादिविवर्धितोऽयं – ५.४
त्वय्येव वीराग्रसरे समग्रां – २.५
दासस्तवायं करवालपाणिः – ५.३
दिल्लीशोपाश्रयेणैव – ३.१३
दिल्लीश्वरानुमतराजपदं पुनस्ते – ९.८
दुर्भेद्यदुर्गाक्रमणे प्रयाणे – १.२२
दुर्वृत्तभृत्याहितराज्यभाराः – १.९
दुर्वृत्ते नृपतौ तु मन्त्रिसचिवा – १.७
देवाग्निविप्रार्चनमन्त्रपूतं – ६.७
देवानां नवविजयध्वजो रणाग्रे – ३.४
द्विजवरसचिवेन्द्रैर्मन्त्रतोयाभिषिक्तो – १०.६
धर्मतः प्रतिविधानमात्मनो – १.२०
धर्मध्वंसधृतव्रतान् परधने – १.२४
धर्मप्रवृत्ताः परिपन्थिनस्त्वया – ४.३
ध्वजवसनपताकामण्डिता राजमार्गाः – १०.१
न मन्यते मन्त्रिकृतार्थनिर्णयं – ६.५
नयप्रयुक्तैर्मधुरैर्वचोभिः – ४.११
न सर्वदा विक्रमशालिनोऽप्यलं – ३.१४
नानाविलासविभवैर्वशतामुपेता – ८.४
नित्यं प्रकाशयति लोकमिमं विवस्वान् – ६.२
निमन्त्रितास्यावमतिर्ममेयं – ८.३
निशेयमाक्रान्ततमिस्रभीषणा – ४.१४
नेत्रप्रसादः स्वयमाननद्युतिः – ४.१२
नैष प्रभाज्वलिततीक्ष्णकरालधारो – ३.५
न्यायानुवर्तिमनमसौ स्वगुरुं निगृह्य – ५.१०
परस्परोन्मूलनसंप्रवृत्तान् – १.६
परे तु तेजस्विनि धर्म्यवृत्तौ – १.१९

पार्श्वस्थानुचरोपजापमुषिता – ८.१
पित्रोर्गुरोश्चाधिगतार्थविद्यो – १.४
प्रच्छन्नं परिपन्थिनां परिचयं – ४.१०
प्रजवतुरगकल्पितासनोऽयं – ४.१९
प्रत्यर्थिनः परिजनेऽतितरां विनीते – ३.७
प्रबलकुटिलविद्विषां विभेत्ता – १०.१०
प्रभावमुख्या न हि शक्तयस्तथा – १.१७
प्रमादतस्त्वादृतसाहसः प्रभु – ४.१३
प्रवर्तितं यैर्भुवनैकचक्र – १.५
प्रारब्धकर्मवशगाः क्रमशो विकारान् – ५.९
प्रोत्साहनेन समराङ्गणतत्परस्य – ३.१६
बाहुप्रतापसमुपात्तदिगन्तकीर्तिः – १०.७
भवन्ति विप्रा यदि धर्ममूर्तयो – ४.१६
भीष्मद्रोणादयः पूर्वे – ६.१०
भोगप्रसक्तस्य महत्पदाप्ति – ६.१
मन्त्रगुप्तिविरहाद् गणसंघौ – १.१८
मन्त्रो विहङ्गैः पशुभिश्च गृह्यते – १.२६
मानं धनं राजविलासभोगान् – १.२१
मुक्तस्य दुष्टयवनाधिपपाशबन्धात् – ९.१
मुक्ताविद्रुमतोरणाङ्कितपुरोद्वाराणि – १०.३
मुक्ताहिरण्मयपटारचितोपकार्या – १०.२
मोदन्तां नितरां स्वकर्मनिरताः – १०.१२
यतिवसनधरो दृढायताङ्गः – २.१
यथाऽत्र लोकव्यवहारसिद्धये – ४.७
यथा समन्तात् सरितः प्रवाहं – १.१३
यवनसादिपदातिसमुद्धतं – ४.१८
यानासने व्यूहविधानमाक्रमं – ६.९
ये क्षमा स्वतपसा दुरात्मनां – ४.६
राज्ञः प्रजायाः परिपालनं यथा – ३.१०
राज्ञां प्रियं बहुमता व्यसने सहाया – ७.५
रात्रिंदिवं रिपुगणान् शतशो निहत्य – ३.१
राष्ट्रैकभक्तिप्रवणैः प्रगल्भैः – ५.५
रिपुप्रकर्षेऽप्यनपागतद्युति – १.११
ललिततरुवितानैर्मण्डिता राजमार्गैः – ८.२
लुलितपथिकनेत्रे पूरयित्वा रजोभि – ५.११
लोकप्रकाशनमरातितमोऽपहारि – ३.१५
लोकसंग्रहपरैर्जितात्मभि : ४.२
वक्रा इमे तरुलतास्तबकैः सुगुप्ता – ७.१
वज्रस्य निर्माणविधौ सुरार्थितां – ४.१५
विक्रीय देशकुलधर्मयशोऽभिमानं – ४.१
विना भृतिं भृत्यगणाः प्रिया मे – २.४
विना विवेकं प्रतिपद्य साहसं – १.१०
विभिन्नधर्मा नृपतिर्निजाः प्रजाः – ३.८
विरोधे विश्रान्ते प्रबलयवनेशस्य – ६.३
विशालवप्रोन्नतगण्डभित्ति – ५.१
विहाय कान्तासुतबन्धुवर्गान् – ३.९
वृत्तं यथा धर्मभयेन रक्ष्यते – ४.४
व्यायामयोगोपचिताङ्गसत्त्वा – ४.५
शक्तित्रयोत्कर्षसमेधितानां – १.१६
शस्त्रास्त्रसंनद्धरणोत्सुका भटाः – २.१०
शिष्या यदुत्कर्षमवाप्नुवन्ति – १.३
श्रुत्वा तव प्रसभमाक्रमणं विपक्षे – ६.६
संयतेन्द्रियमनाः प्रसन्नधीः – २.८
संस्थाप्य विक्रमजितं भुवि धर्मराज्यं – १०.५
संक्रम्य गुप्तान् विषमाद्रिमार्गा – ७.३
सत्त्वोद्रेकाल्लसन्तोऽप्युदितनयगुणा – ६.४
सदाश्रयोऽयं विदुषां कलावतां – ३.१२
सन्धानं सत्यसन्धे नयगुणविहितं – ३.११
समानविद्यानयविक्रमेषु – १.२३
साम्ना क्षत्रपुलिन्दवृन्दनृपती – १.२७
साहाय्यमासाद्य महद्वनौकसां – १.१४
सुतीक्ष्णभल्लासिधनुःसमूर्जिता – २.११
स्वच्छन्दगामी गिरिगह्वरालयो – ८.७
स्वल्पोऽप्यग्निर्ज्वलयति न किं – १.१२
स्वातन्त्र्यभावज्वलिताहवाग्नौ – १०.९
स्वातंत्र्यवह्निज्वलितः समन्ततः – २.३
स्वामिनं तु निजधर्मविच्युतं – ७.७
हुत्वा देहं निजं ये समरहुतवहे – १०.११

## पद्यानां छन्दःसूची

| | |
|---|---|
| अनुष्टुप् – | १/२८, ३/१३, ६/१० |
| उपजाति – | १/३, १/४, १/५, १/६, १/८, १/९, १/१०, १/११, १/१३, १/१४, १/१६, १/१७, १/१९, १/२१, १/२२, १/२३, १/२६, २/२, २/३, २/४, २/५, २/७, २/९, २/१०, २/११, ३/८, ३/९, ३/१०, ३/१२, ३/१४, ३/१७, ४/३, ४/४, ४/५, ४/७, ४/११, ४/१२, ४/१३, ४/१४, ४/१५, ४/१६, ४/१७, ५/१, ५/२, ५/३, ५/४, ५/५, ५/६, ६/१, ६/५, ६/७, ६/९, ७/३, ८/३, ८/५, ८/७, ८/८, ९/४, ९/५, ९/६, ९/७, १०/८, १०/९ |
| गीति – | १/२ |
| द्रुतविलम्बित – | ४/१८ |
| पुष्पिताग्रा – | २/१, ३/६, ४/८, ४/१९, १०/१० |
| प्रहर्षिणी – | ३/४ |
| मन्दाक्रान्ता – | १/१२, १/२५ |
| मालिनी – | ३/३, ५/११, ८/२, ९/२, १०/१, १०/६ |
| रथोद्धता – | १/२०, २/६, २/८, ४/२, ४/६, ७/७ |
| वसन्ततिलका – | ३/१, ३/२, ३/५, ३/७, ३/१५, ३/१६, ४/१, ४/२०, ५/७, ५/८, ५/९, ५/१०, ६/२, ६/६, ७/१, ७/२, ७/५, ७/६, ८/४, ८/६, ९/१, ९/३, ९/८, १०/२, १०/५, १०/७ |
| शार्दूलविक्रीडित – | १/१, १/७, १/१५, १/२४, १/२७, ४/१०, ८/१, १०/३, १०/४, १०/१२ |
| शालिनी – | ६/८ |
| शिखरिणी – | ६/३ |
| स्रग्धरा – | ३/११, ४/९, ६/४, ७/४, १०/११ |
| स्वागता – | १/१८ |

## गीतानां तालिका

| क्रम | स्थान | ध्रुवपदम् | राग | ताल |
|---|---|---|---|---|
| १. | प्रस्तावना | रसमति रसयति रसा विशाला ॥ | मल्लार | त्रिताल |
| २. | २/७ पश्चात् | तारय तव सुतमम्ब भवानि ॥ | कर्णाट (दरबारीकानडा) | त्रिताल |
| ३. | चतुर्थाङ्कान्ते | भट्टा नदताट्टमेव – हर हर हर महादेव ॥ | भूपाली (भूप) | दादरा |
| ४. | ७/६ पूर्वम् | सुमसुकुमार नयनविहार ॥ | बिहाग | तेवरा |
| ५. | ८/२ पश्चात् | लताकुञ्जलीना ॥ | कर्णाट (कौशिककानडा) | झम्पा |
| ६. | १०/६–७ मध्ये | कृपालो छत्रपते महाराज ॥ | मालकोश (कोष्टकान्तर्निर्विष्टरागानुसारेण स्वरसंयोगाः दत्ताः परिशिष्टे) | त्रिताल |

## गीतानां स्वरसंयोगः ।

### गेयपद्यानां स्वरसंयोगः ।

### १. राग गौण्डमल्लार, ताल–त्रिताल, (पृ. ९२)

**स्थायी**

२ ० ३ x
रे ग रे म । ग रे सा सा । रे ग रे ग । म प म ग ।
र स म ति । र स य ति । र सा ऽ वि । शा ऽ ला ऽ ।

२ ० ३ x
रे ग रे म । ग रे सा सा । रे ग रे ग । म प म ग ॥
वि व ल ति । च प ल प । यो ऽ ध र । मा ऽ ला ऽ ॥

**अन्तरा**

२ ० ३ x
रे ग रे प । प – प – । म प ध सां । ध प म ग ।
भ व ति स । प दि ज न । ता ऽ प वि । ल य नं ऽ ।

२ ० ३ x
रे ग रे म । ग रे सा सा । रे ग रे ग । म प म ग ॥
मृ ऽ ग्य ति । मृ ग प ति । रु प रि नि । ल य नं ऽ ॥

### २. राग दरबारी कानडा, ताल–त्रिताल. (पृ. १०७)

**स्थायी**

३ x २
गं ग रे सा । नि सा रे म प । ग – रे सा । रे – सा सा ॥
त व सु त । म ऽ म्ब भ । वा ऽ ऽ नि । ता ऽ र य ।

**अन्तरा**

० ३ x २
म म म प । प ध – प ध । सां – – – । ध – नि सां ।

प्र ब ल य । व न ऽ रि पु । ग लि त बि । भा ऽ ऽ वं ।

°  ३  x  २
मं म प प । ध – नि सां । नि प म प । ग – रे सा
प्र ल य प । यो ऽ नि धि । वि लु लि त । ना ऽ वं ऽ ।

°  ३  x  २
गं ग रे सा । नि सा रे म प । गं – रे सा । रें – सा सा ॥

पा ऽ ल य । प र म मृ । डा ऽ ऽ नि । ता ऽ र य ॥

### ३. राग भूप, ताल–दादरा. (पृ० १३६)

#### स्थायी

x  °  x  °
धं – सां ।– ध प । गं ग प । गं रे सा ।
भ ऽ ट्टा । ऽ न द । ता ऽ ट्ट । मे ऽ व ।

x  °  x  °
गं रे ग । रें प प । गं ग रे । सां – सा ॥
ह र ह । र ह र । म हा ऽ । दे ऽ व ॥

#### अन्तरा

x  °  x  °
गं ग ग । पं प प । पं ध प । सां – सां ।
प्र क ट । य त क । ट ऽ प्र । ता ऽ प ।

x  °  x  °
धं सां ध । सां रें रें । सां रें सां । धं – प ।
म रि कु । ल घ टि । तो ऽ प । ता ऽ प ।

x  °  x  °
गं – गं । गं रें रें । सा रें सा । धं – प ।
हृ ऽ ष्टा । ऽ न द । ता ऽ ट्ट । मे ऽ व ।

x  °  x  °
गं रे ग । रें प प । गं ग रे । सां – सा ॥
ह र ह । र ह र । म हा ऽ । दे ऽ व ॥



### ४. राग बिहाग, ताल–तेवरा. (पृ० १५५)

#### स्थायी

२  ३  x
ग म । प म । ग रे सा ।
सु म । सु कु । मा ऽ र ।

२  ३  x
ग म । प सां । नि – प ॥
न य । न वि । हा ऽ र ॥

#### अन्तरा

२  ३  x
ग म । प नि । सां – सां ।
हृ द । या ऽ । धा ऽ र ।

२  ३  x
नि – । नि ध । सां नि – ।
यौ ऽ । व न । सा ऽ र ।

२  ३  x
गं रें । गं मं । गं रें सां ।
प्र ण । या ऽ । वा ऽ र ।

२  ३  x
ध प । ग म । ग रे सा ॥
पा ऽ । रा ऽ । पा ऽ र ॥

### ५. राग कौशिककानडा, ताल–झंपा. (पृ० १५९)

#### स्थायी

°  ३  x  २
नि । ध – । म – प । नि नि । सां –
ल । ता ऽ । कुं ऽ ज । ली – । ना ऽ

#### अन्तरा

°  ३  x  २  °
म । मं – । ध – नि । सां – । नि सां – । नि सां ।
तृ । णा – । ङ्के ऽ श । या ऽ । ना ऽ स्व । बा ऽ ।

रे – सां । नि सां । नि ध – । ध – । मध नि ध ।
हू ऽ प । धा ऽ । ना ऽ स्व । यं ऽ । वी ऽ त ।

म प । ग रे सा । रे – । ग – – । रे सां । रे – सा ।
मा ऽ । ना ऽ प्रि । ये ऽ । सा ऽ व । धा ऽ । ना ऽ शु ।

सां – । सां – रें । नि – । म –प । नि नि । सां – सां ।
चा ऽ । वि ऽ ह्व । ला ऽ । ते ऽ न । वी ऽ । ना ऽ नि ।

नि – । सां – नि ।
ली ऽ । ना ऽ ल ।

## ६. राग मालकोश, ताल–त्रिताल, (पृ० १७७)

### स्थायी

° ३ x २
ग – सा – । नि सा नि सा । म – ग म । ग म ग सा ।
छ ऽ त्र प । ते ऽ म हा । रा ऽ ज कृ । पा ऽ लो ऽ ।।

### अन्तरा

° ३ x २
ग – म म । ध – नि नि । सां – सां सां । सां सां सां सां ।
भा ऽ र त । व ऽ र्ष न । रे ऽ श कु । ल प ते ऽ ।

° ३ x २
नि नि नि नि । ध – म – । म ध – नि । सां नि ध म ।
न य स मु । पा ऽ र्जि त । दि ग ऽ न्त । की ऽ र्ते ऽ ।

° ३ x २
ध नि सां मं । गं – सां – । नि ध – म । ग म ग सा ।।
र मा ऽ प । ते ऽ ऽ ऽ । म हा ऽ ऽ । रा ऽ ऽ ज ।।